दैनिकम् ई-संस्कृतवार्तापत्रम्

हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ हेमन्त-ऋतुः
सूर्यः दक्षिणायनम् कार्तिकशुक्लसप्तमी
मार्गशीर्ष 01 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-10 ■ वर्ष-6 ■ अङ्क-20 | 1 | नवम्बर 16, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 पुरुष-क्रिकेट्-क्रीडायां, माउण्ट मौङ्गानुयी इत्यत्र पञ्चमायां अन्तिमायाञ्च एकदिवसीय अन्ताराष्ट्रिय-क्रीडायां भारतदेशः न्यूजीलैण्ड-देशं पराजितवान्

4 हिमाचले बृहत् प्रशासनिकं परिवर्तनम्: सप्त- एचपीएएस अधिकारिणां स्थानान्तरणम्

10 कुमारभास्करवर्म-संस्कृत-पुरातनाध्ययन-विश्वविद्यालये तृतीयदीक्षान्तसमारोहानुष्ठानम्

जनजातीय-गौरव-दिवसः राष्ट्रिय-उत्सवः अभवत् - प्रधानमन्त्री नरेन्द्रमोदी



हिमसंस्कृतवार्ता। प्रधानमन्त्री नरेन्द्रमोदी उक्तवान् यत् एकविंशदुत्तरद्विसहस्र-तमवर्षस्य नवम्बर-मासस्य पञ्चदश-दिनाङ्कादारब्धः जनजातीय-गौरव-दिवसः अधुना राष्ट्रिय-उत्सवः सञ्जातोऽस्तीति। महाराष्ट्रस्य गडचिरोली-नगरे जनजातीय-गौरव-दिवस-कार्यक्रमे आभासीय माध्यमेन सम्बोधयन् श्रीमोदी अवदत् यत्, एकः कालः आसीत् यदा देशस्य बहवः दिवसाः उत्सवाश्च विदेशीयदृष्टिकोणेन निर्धारिताः आसन्, परन्तु अद्य भारतं स्वपरम्परां, इतिहासं, नायकान् च आत्मसम्मान-भावेन स्मरति। सः अवदत् यत्, परिवर्तनमेतत् राष्ट्रिय-चेतनायाः महत्तां सूचयति । प्रधानमन्त्री प्रायः त्रिसहस्र कोटिरूप्यकाणां षड्चत्वारिंशदधिकद्विशत-जनजातीय-विकास-परियोजनानां उद्घाटनम्, शिलान्यासञ्च कृतवान्। कार्यक्रमावसरे प्रधानमन्त्रिणा प्रायः त्रि-सहस्र-कोटि-रूप्यकाणां सार्द्धद्विशतप्रायः विकास परियोजनानां उद्घाटनम्, शिलान्यासञ्च कृतः। एतासां परियोजनानां उद्देश्यमस्ति सम्पूर्ण-देशे आदिवासि-समुदायेभ्यः शिक्षायाः, स्वास्थ्यसेवायाः, जीविकायाः, सामुदायिक-संरचनायाश्च सुदृढीकरणमिति। अवसरेऽस्मिन् मिजोरम-राज्यस्य ऐजोल-नगरं निकषा केल्सिह-नगरे रोप्विलियानी-जनजातीय स्वातन्त्र्य-योद्धानां सङ्ग्रहालयस्य आभासीयमाध्यमेन उद्घाटनम् कृतम्, आयोजनमिदं भगवान् बिरसा मुण्डा-वर्यस्य एकाधिक-सार्धेकशततमे जन्मवार्षिक्ये, जनजातीय-गौरव-दिवस-रूपेण आचर्यमाणस्य राष्ट्रव्यापी-उत्सवस्य भागमस्ति।

स्वदेशीय-रक्षा-क्षमताः भारतं सुदृढं स्वावलम्बीयं च रक्षा भविष्यं प्रति प्रेरयन्ति - रक्षामंत्री राजनाथसिंहः

रक्षामन्त्री राजनाथसिंहः अवदत् यत् भारतस्य वर्धमानाः स्वदेशीयाः क्षमताः राष्ट्रं सुदृढं आत्मनिर्भरस्य रक्षाभविष्यस्य च दिशि अग्रे नयन्ति। एतासु क्षमतासु प्रक्षेपास्त्रविकासः, नौसेनाय अवसराः, अन्तरिक्षविमाननिर्माण-अभियांत्रिकी, रडार-प्रणाल्यः तथा अन्तरिक्षोपयोगाः च सन्ति। सः तेलङ्गानाराज्यस्य हदियेबादनगरे आयोजितायाः अप्रणाशक-मूल्याङ्कनस्य समर्थकप्रौद्योगिकीनां च षट्त्रिंशत्तमस्य वार्षिकसम्मेलनस्य अन्ताराष्ट्रिय-संगोष्ठ्यावसरे आभासीयमाध्यमेन सम्बोधयन्नासीत्। गुणवत्तायाः महत्त्वं प्रतिपादयन् मन्त्री अवदत् यत् कस्यापि राष्ट्रस्य प्रगतिः केवलं तेन विकसिताभिः प्रौद्योगिकीभिः न भवति, अपितु तेन निर्मितानां प्रणालीनां गुणवत्ता, विश्वसनीयता, सुरक्षा च तस्याः प्रगतेः आधाराः भवन्ति । श्रीसिंहः अवदत् यत् गुणवत्ता केवलं निर्माणस्य आवश्यकता नास्ति, अपितु कार्यसञ्चालनस्य विश्वसनीयतायाः राष्ट्रियसुरक्षायाश्च अत्यावश्यकः भागः अस्ति। सः एतदपि प्रतिपादितवान् यत् भविष्ये प्रमाणितानां निरीक्षणप्रविधीनां उन्नताङ्कीय प्रौद्योगिकीभिः सह बुद्धिमत्तापूर्णः समन्वयः महत्त्वपूर्णः भविष्यति।

भारत-सिङ्गापुर्-देशयोः मध्ये सहयोगाय बृहत्तरसामञ्जस्यस्य आवाहनम् अकरोत् शिक्षामन्त्री



शिक्षामन्त्री प्रह्लाद जोशी नवान्वेषणस्य प्रोत्साहनाय, नूतनविचारान् व्यावहारिक-समाधानरूपेण परिवर्तयितुं च भारत-सिङ्गापुर्-देशयोः मध्ये सहयोगाय बृहत्तरसामञ्जस्यस्य आवाहनम् अकरोत्। श्रीजोशी अद्य सिङ्गापुर्-नगरे चतुर्थस्य सिङ्गापुर्-भारत-हन् इत्यस्य उद्घाटनसमारोहे सम्बोधयन् आसीत्। अस्य मासस्य सप्तदश दिनाङ्कपर्यन्तं त्रिदिनात्मकं हैकथान् इति आयोजनं आयोज्यते।

सुभाषितम्

नास्ति वेदसमं शास्त्रं नास्ति शान्तिसमं सुखम्।।
नास्ति सूर्यसमं ज्योतिर्नास्ति ज्ञानसमं धनम्।।

भावार्थः- वेदों के समान श्रेष्ठ अन्य कोई धार्मिक ग्रन्थ नहीं हैं और न मानसिक शान्ति के समान अन्य कोई सुख है। सूर्य के समान प्रकाश उत्पन्न करने वाला संसार में अन्य कोई नहीं है तथा ज्ञान के समान अन्य और कोई धन या सम्पत्ति श्रेष्ठ नहीं होती है।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११
कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्तापत्रे दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्राकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी गुजरातम्, बृजेश कुमार पाण्डेया, उ.प्र, सत्येन्द्रपाठकः उ.प्र, डा.विमलेश झा बिहारम्, डा.राघवनाथ झा बिहारम्, डॉ.पद्मनाभः हिमाचलम्, डा.निशिकान्त पाण्डेयः प.बंगाल, नवीन ममगाईं उत्तराखण्ड, कुलदीप मैन्दोला उत्तराखण्ड, डा.नवीनशर्मा हरियाणा, अजय कुमार आर्य पंजाब, ईशान तिवारी दिल्ली, रवि खरडिहालः कर्नाटक, डॉ.वर्षा टोणगांवकरः, सुधा साळवे महाराष्ट्रम्, ईदर धीरजः आन्ध्रप्रदेशः, नारद उपाध्यायः, डा.नयन ज्योति शर्मा असम

ईजिप्ट् देशे भारतीय-समुदायः द्वयोः देशयोः मध्ये सजीवः सेतुः अस्ति - पीयूषगोयलः



केन्द्रीय-वाणिज्योद्योग-मन्त्री पीयूषगोयलः अवदत् यत् ईजिप्ट् देशे भारतीय-समुदायः द्वयोः देशयोः मध्ये सजीवः सेतुः अस्तीति, येन आर्थिकं, सांस्कृतिकञ्च जनसम्पर्कं सुदृढं कर्तुं तस्य भूमिकां प्रकाशयते। ईजिप्ट् देशे भारतीय-समुदाय-सङ्केन आयोजिते भारतीय-समुदाय-कार्यक्रमे सम्भाषमाणः गोयल-वर्यः अवदत् यत् वर्तमानकाले प्रायः सार्द्ध षड्-बिलियन डालर मूल्यकं द्विपाक्षिकव्यापारम् उभयदेशयोः सहभागित्वस्य आरम्भमेव सूचयति। प्रवासकाले, सः काहिरा-नगरस्य हेलियोपोलिस्-युद्ध-स्मारके भारतीयसैनिकान् श्रद्धाञ्जलिम् अददात्। श्रीगोयलः भारत-ईजिप्ट्-देशयोः सम्बन्धान् सुदृढं कर्तुं, व्यापार-निवेश औद्योगिक-सहकारञ्च विस्तारयितुं द्विदिवसीययात्रायाम् काहिरा-नगरे आसीत्।

पुरुष-क्रिकेट्-क्रीडायां, माउण्ट मौङ्गनुयी इत्यत्र पञ्चमायां अन्तिमायाञ्च एकदिवसीय अन्ताराष्ट्रिय-क्रीडायां भारतदेशः
न्यूजीलैण्ड-देशं पराभूय श्रृंखलां स्वायत्ती अकरोत्



भारत-न्यूजीलटिई-देशयोः मध्ये विहितायाम् एकदिवसीयश्रृङ्खलायाः अन्तिमायां क्रीडास्पर्धायां भारतदेशः न्यूजीलैण्ड्देशं विंशतिः धावनाङ्कैः पराजितवान्। एवं भारतदेशः माउण्ट् मौन्गानुई-क्रीडाङ्गणे विजयम् अवाप्य श्रृङ्खलां स्वनाम्नि कृतवान्। अनेन जयेन सह भारतदेशेन न्यूजीलैण्ड्देशस्य एकादशक्रीडास्पर्धानां अविच्छिन्नविजयक्रमः समापितः। प्रथमं क्रीडयता भारतदेशेन नवत्यधिकद्विशत-धावनाङ्काः विनिर्मिताः, प्रत्युत्तररूपेण न्यूजीलैण्डदेशेन च केवलं सप्ताशीत्यधिकक-शतधावनाङ्काः एव कृताः ।

पुणेनगरे 'नेशनल हेवी इंजीनियरिंग कोऑपरेटिव लिमिटेड' इत्यस्य पुनरुज्जीवनं 'भारत-टैक्सी' सेवायाश्च शुभारम्भः



हिमसंस्कृतवार्ता। केन्द्रीय-गृह-सहकारिता-मन्त्री श्री-अमित-शाहः उद्घोषितवान् यत् महाराष्ट्रस्य पुणेनगरे पुनः आरभ्यमाणे 'नेशनल हेवी इंजीनियरिंग कोऑपरेटिव लिमिटेड' (NHEC) इत्यत्र २०२७ तमस्य वर्षस्य दिसम्बरमासात् पूर्वम् उत्पादनस्य आरम्भः भविष्यति इति। तेन उक्तं यत् अस्मिन् एकके शर्करा-निर्माणशालानां कृते यन्त्राणि, दुग्धोत्पादनोपकरणानि तथा इथेनॉल-सङ्कुचित-जैव-वायु-परियोजनानाम् (CBG) आवश्यकयन्त्राणां निर्माणं भविष्यति। अनेन प्रयासेन आयातनिर्भरतायाः न्यूनता, स्वदेशीयविनिर्माणस्य प्रोत्साहनं, वृत्यवसराणां सृजनं निर्यातवृद्धिश्च भविष्यति।

श्रीशाहः पुणेनगरे 'नेशनल हेवी इंजीनियरिंग कोऑपरेटिव लिमिटेड' इत्यस्य आधारशिलास्थापनम्, सहकारीसमितीनां पञ्जीयकस्य क्षेत्रीयकार्यालयस्य उद्घाटनं तथा 'भारत-टैक्सी' सेवायाः शुभारम्भं च कृत्वा एतत् अवदत्। तेन उक्तं यत् ११० एकर-परिमिते क्षेत्रे विस्तृता एषा सहकारीसंस्था पूर्वं भारतस्य अन्येषां बहूनां देशानां च शर्करा-निर्माणशालाभ्यः यन्त्राणि प्रददाति स्म। अस्याः पिधानानन्तरं केन्द्रीयसहकारितामन्त्रालयेन राष्ट्रीय-दुग्ध-विकास-परिषद् (NDDB), अमूल, इफको (IFFCO), एन.सी.डी.सी. (NCDC), नेफेड (NAFED) तथा अन्येषां सहकारीसङ्घटनानां निवेशेन एनां पुनः आरब्धुम् उपक्रमः कृतः।

अस्मिन् प्रतिष्ठाने शर्करा, दुग्धोत्पादनं, विद्युदुत्पादनम्, इथेनॉल तथा सङ्कुचित-जैव-वायु-क्षेत्राणां कृते उपकरणानि निर्मीयन्ते। अपि च, रेलमार्ग-रक्षाक्षेत्रयोः कृते उपकरणानि तथा निर्यातार्थं आधानपात्राणि (कन्टेनर्) निर्मातुमपि योजना अस्ति। श्रीशाहः अवदत् यत् अनया परियोजनया संसाधनानां समुचितः उपयोगः सुनिश्चितः भविष्यति तथा शर्करोत्पादनात् प्राप्तानां सह-उत्पादानाम् अधिकतमोपयोगेन चक्रीय-अर्थव्यवस्थायै प्रोत्साहनं मिलिष्यति। अनेन कृषकाणां कृते अतिरिक्त-आयस्य अवसराः अपि उत्पत्स्यन्ते।

'भारत-टैक्सी' सेवायाः विषये श्रीशाहः अवदत् यत् एषः चालकानां स्वामित्वयुक्तः सहकारी-उपक्रमः अस्ति, यस्य उद्देश्यं निजी-टैक्सी-सङ्गहक-समवायानां शोषणात् तेषां रक्षणम् अस्ति। तेन उक्तं यत् यात्रामूल्यस्य सम्पूर्णा राशिः विना किमपि कमिशन-कर्तनं साक्षात् चालकानां वित्तकोषलेखासु प्रेषयिष्यते। एषा सेवा मुम्बई-नासिक-पुणे-नगरेषु आरब्धा अस्ति तथा देशस्य अन्येषु नगरेष्वपि अस्याः विस्तारः करिष्यते।



मनीलानगरे ४९ तमं 'आसियान'-शिखरसम्मेलनम् आरब्धम्; प्रधानमन्त्री श्रीनरेन्द्रमोदी श्वः फिलीपीन्स-यात्रायै प्रस्थास्यति

फिलीपीन्सदेशस्य मनीलानगरे अद्य ४९ तमम् 'आसियान' (ASEAN) शिखरसम्मेलनम् आरब्धम्। अस्मिन् अवसरे फिलीपीन्सदेशस्य राष्ट्रपतिः फर्डिनेंड-मार्कोस-जूनियरः भू-राजनीतिक-तनावस्य, आर्थिक-अनिश्चिततानां तथा सुरक्षा-आह्वानानां निवारणाय क्षेत्रीय-एकजुटतायाः सामूहिक-प्रयासानां च आह्वानं कृतवान्। अस्मिन्नेव क्रमे, प्रधानमन्त्री श्रीनरेन्द्रमोदी २३ तमे 'आसियान-भारत' शिखरसम्मेलने तथा २१ तमे 'पूर्वी-एशिया' शिखरसम्मेलने च भागं ग्रहीतुं श्वः आरभ्य द्विदिवसीय-फिलीपीन्स-यात्रायां भविष्यति। एतौ द्वौ अपि शिखरसम्मेलनौ मनीलानगरे आयोजयिष्येते।

बैडमिण्टन्-क्रीडायां भारतस्य लक्ष्यसेनः कुमामोटो-मास्टर्स-जापान-पुरुष एकलेति उपाधिम् अवाप्नोत्



बैडमिण्टन्-क्रीडायां भारतस्य लक्ष्यसेनः रोमाञ्चकरायां त्रि-क्रीडात्मकायाम् अन्तिमस्पर्धायां जापान-देशस्य कोकी वतनाबे इत्येनं पराजित्य कुमामोटो-मास्टर्स-जापान-पुरुष एकलेति उपाधिम् अवाप्नोत्। अनेन विजयेन सः प्रतियोगितायां प्रथमः भारतीयः विजेता क्रीडकः अभवत्।

'खेलो इण्डिया' युवाक्रीडायाः अष्टमसंस्करणस्य प्रतीकचिह्नस्य शुभङ्करस्य च अनावरणम्



युवकार्यक्रम-क्रीडामन्त्री डॉ. मनसुख-माण्डविया तथा तेलङ्गानायाः मुख्यमन्त्री ए. रेवन्त-रेड्डी च अद्य 'खेलो इण्डिया' युवाक्रीडायाः अष्टमसंस्करणस्य प्रतीकचिह्नस्य (लोगो) शुभङ्करस्य च अनावरणं कृतवन्तौ। एतासां क्रीडानाम् आयोजनं दिसम्बरमासस्य ११ तः २२ दिनाङ्कपर्यन्तं तेलङ्गानायाः षट्सु नगरेषु करिष्यते।सभां सम्बोधयन् डॉ. माण्डविया अवदत् यत् प्रधानमन्त्री नरेन्द्रमोदी यूनः क्रीडाभिः सह योजयितुं तथा क्रीडाः देशस्य विकासस्य अभिन्नम् अङ्गं निर्मातुं च विशेषं बलं दत्तवान् अस्ति। तेन उक्तं यत् 'खेलो इण्डिया' उपक्रमस्य अन्तर्गतं यूनः क्रीडासु अधिकाधिकं सहभागित्वं प्रोत्साहयितुं 'खेलो इण्डिया युवाक्रीडा', 'खेलो इण्डिया समुद्रतटक्रीडा' (बीच गेम्स), शीतकालीनक्रीडाः तथा जनजातीयक्रीडाः च इति विविधक्रीडानाम् आयोजनं क्रियमाणम् अस्ति।अस्मिन् अवसरे तेलङ्गानायाः मुख्यमन्त्री ए. रेवन्त-रेड्डी अवदत् यत् 'खेलो इण्डिया' युवाक्रीडासदृशानि आयोजनानि यूनः मादकद्रव्यव्यसनात् अन्येभ्यः सामाजिक-आह्वानेभ्यः च दूरं स्थातुं प्रोत्साहयित्वा प्रधानमन्त्रिणः 'नशामुक्त-युवा विकसित-भारतम्' इति दृष्टिकोणम् अग्रे नेतुं सहायकाः भविष्यन्ति।डॉ. माण्डविया तथा श्रीरेड्डी तेलङ्गानायां 'खेलो इण्डिया' युवाक्रीडानाम् आयोजने मार्गदर्शनार्थं सहयोगार्थं च प्रधानमन्त्रिणं नरेन्द्रमोदिनं प्रति आभारं प्रकटितवन्तौ।क्रीडामन्त्रालयेन सूचितं यत् एतासु क्रीडासु प्रायः अष्टसहस्रं (८,०००) क्रीडकाः प्रतिभागिनश्च भागं ग्रहीष्यन्ति इति अपेक्षा अस्ति। अष्टमसंस्करणे २७ प्रतिस्पर्धात्मकक्रीडाः द्वे प्रदर्शनस्पर्धे च मिलित्वा २९ विधाः सम्मिलिताः भविष्यन्ति।

उत्तर- पश्चिमी हिमालयस्य पर्यावरणस्य ऐतिहासिक- समकालीनप्रेरणाः इति विषये ठाकुररामसिंह- इतिहासशोधसंस्थाने राष्ट्रीय- परिसंवादस्य समापनम्



हिमसंस्कृतवार्ताः- डॉ. अमितशर्मा, हमीरपुरं, ठाकुररामसिंह- इतिहास- शोधसंस्थानं नेरी हमीरपुरम् इत्यनेन भारतीय- इतिहास- अनुसंधान- परिषद् नवदेहली इत्यस्य सहयोगेन उत्तरपश्चिमी हिमालये पर्यावरणस्य ऐतिहासिक- समकालीन- परिप्रेक्ष्याः इति विषये संस्थानपरिसरे द्विदिवसीयस्य राष्ट्रीयपरिसंवादस्य समापनसत्रम् आयोजितम्। कार्यक्रमे मुख्यातिथिरूपेण उद्योगपतिः दिल्लीतः प्रेमराणावर्यः, कार्यक्रमस्य अध्यक्षः डॉ. राजेन्द्र प्रसादवर्यः केन्द्रीय- कृषि- विश्वविद्यालयः पूसा बिहार इत्यस्य कुलाधिपतिः पद्मश्री डॉ. पी. एल. गौतमवर्यश्च उपस्थिताः आसन्।

मञ्चस्थ- अतिथिनां परिचयस्य सम्मानस्य च अनन्तरं संस्थानस्य निदेशकः डॉ. चेतराम गर्गमहोदयः अतिथिनां स्वागतं कुर्वन् संस्थानस्य ऐतिहासिकी सांस्कृतिक- अकादमिक- गतिविधीनां गतवर्षेषु कृतानां शोधकार्याणां च सूचनां प्रदत्तवान्। सः अवदत् यत् संस्थानं भारतीय- इतिहास- संस्कृति- सभ्यतायाः विभिन्नपक्षाणाम् उपरि प्रमाणाधारित- अनुसन्धानस्य हिमाचलप्रदेशस्य स्थानीय- क्षेत्रीय- इतिहासस्य च लेखनाय निरन्तरं कार्यं करोति। सः अवदत् यत् राष्ट्रीय परिसंवादेन सम्बद्ध विषयाणां उपरि चर्चा कृता यस्य उपरि नीतिपत्रं निर्माय सर्वकाराय प्रेष्यते। मुख्यातिथिः प्रेमराणामहोदयः सम्बोधयन् अवदत् यत् पर्यावरणं रक्षितुम् आधुनिकतावादस्य उपरि शोधं कर्तव्यं तदा एव वयं पर्यावरणं रक्षितुं शक्नुमः। सः अवदत् यत् अस्माकं प्राकृतिक- जलस्रोताः समाप्ताः जाताः सन्ति, तेषां कृते वयं सर्वे उत्तरदायिनः स्मः।प्रकृतिः केवलं जीवनस्य आधारः न अपि तु अस्माकं संस्कृति सभ्यतायाः अस्तित्वस्य च अभिधानम् अपि अस्ति। मुख्यातिथि महोदयः अवदत् यत् मनुष्यस्य जन्म प्रकृतेः क्रोडे भवति, तस्य सम्पूर्णं जीवनं जल- वायु- मृदा- वनस्पति- उपरि निर्भरं भवति। एतस्य अनन्तरम् अपि अद्य मनुष्यः विकासस्य अन्धप्रतिस्पर्धायां ताम् एव प्रकृतिं निरन्तरं दोहनं कुर्वन् अस्ति यः तस्मै जन्म प्रदत्तवान्। सः अवदत् यत् इदानीं ये मार्गाः सेतूनां च निर्माणं क्रियते तस्य आधुनिकतावादस्य रीत्या भवेत् येन पर्यावरणाय क्षतिः न भवेत्। अद्य जलवायुपरिवर्तनं, वैश्विकतापवृद्धिः (ग्लोबलवार्मिंग) वनोच्छेदनं, जलप्रदूषणं, वायुप्रदूषणं, जैवविविधतायाः सङ्कटं च सम्पूर्णस्य जगतः पुरतः गम्भीरम् आह्वानं भूत्वा तिष्ठति।

कार्यक्रमस्य अध्यक्षः पद्मश्री डॉ. पी. एल. गौतमवर्यः अवदत् यत् जनसङ्ख्यायाः वृद्धिः अपि सङ्कटस्य सन्देश अस्ति यदि अस्माभिः आगामि- सन्ततिः संरक्षणीया तर्हि विकासः वैज्ञानिक- आधारेण करणीयः यस्मिन् नूतनं तन्त्रज्ञानं भवेत् तदा एव वयं अग्रे गन्तुं शक्नुमः पर्यावरणं च रक्षितुं शक्नुमः। सः अवदत् यत् 1972तमे वर्षे प्रथमवारं पर्यावरणस्य उपरि चिन्तनम् अभवत्, 1992तमे वर्षे पर्यावरणं रक्षितुम् अनेकाः प्रयासाः कृताः आसन्। अद्य युवावर्गस्य कृते पर्यावरणसंकट- निवारणाय शोधः करणीयः तदा एव समाजः सुरक्षितः स्थापयितुं शक्यते। शोधसंस्थानस्य अध्यक्षः प्रो. भागचन्दचौहानः अवदत् यत् पर्यावरणं रक्षितुं ये अनुसन्धानाः कृताः ते श्लाघनीया सन्ति, युवावर्गेण च अस्मिन् परिसंवादे यः पारदर्शित्वं प्रदर्शितं तत् श्लाघनीयम् अस्ति। सः अवदत् यत् पूर्वजैः पिप्पल- वट- तुलसी- निम्बसदृशानां वृक्षाणां धार्मिकं महत्त्वं प्रदत्तं, नदीभ्यो च मातुः स्थानं प्रदत्तं, पर्वताः वनानि जलस्रोतांसि च पवित्राः मन्यन्ते स्म एतासां परम्पराणां पृष्ठतः पर्यावरण संरक्षणस्य गम्भीरा भावना निहिता आसीत्।समापनसत्रस्य अवधौ विद्वांसः परिसंवादस्य आयोजनस्य श्लाघां कुर्वन् अवदन् यत् युवा- शोधार्थानां सहभागिता श्लाघनीया आसीत्, तैः च शोधक्षेत्रे चिन्तनं करणीयम्। कार्यक्रमस्य अन्ते संस्थानस्य महासचिवः भूमिदत्तशर्मा सर्वेषाम् अतिथिनां विदुषां सहभागिनां च आभारं प्रकटितवान्। राष्ट्रगानेन सह राष्ट्रीय परिसंवादस्य समापनम् अभवत्। राष्ट्रीय- परिसंवादस्य संयोजकः डॉ. जगदीशप्रसादवर्यः सूचनां प्रदत्तवान् यत् अद्य सप्तसु तकनीकीसत्रेषु अशीतिः शोधपत्राणि प्रस्तुतानि, छात्रशोधपत्रवाचन- प्रतियोगितासत्रस्य आयोजनं कृतम्। अस्यां प्रतियोगितायां प्रथमा सुश्री बन्धुः, द्वितीया सोमदेवः, तृतीयस्थाने विपाशा कविता च पुरस्कारं प्राप्तवत्यौ। अस्मिन् परिसंवादे आहत्य अष्टात्रिंशदुत्तरशतं (१३८) विद्वांसः शोधार्थिनः च पंजीकरणं कृतवन्तः। परिसंवादे संस्थानस्य महासचिवः भूमिदत्तशर्मा, उपाध्यक्षः सुरेन्द्रनाथशर्मा, कोषाध्यक्षः देशराजशर्मा, प्रो. नारायणसिंहरावः, नरेन्द्रकुमारनन्दा, जगवीरः, रमेशरांगड़ा, प्रो. राजेशकुमारशर्मा, डॉ. ओमदत्तसरोचः, डॉ. अंकुश भारद्वाजः, डॉ. मनमोहनशर्मा, प्रो. कंवर चन्द्रदीपसिंहः, डॉ. तनवीरः, जम्मूकश्मीरात् सुमेर खजूरिया, प्रो. राजेशकुमारशर्मा, डॉ. राकेशकुमारशर्मा, डॉ. ऋषिः डॉ. रामपालः च इत्येतैः सह प्रायः पञ्चविंशत्यधिकशतं विद्वांसः शोधार्थिनः च उपस्थिताः आसन्।

काङ्गड़ा-मण्डलम् अभवत् गृध्राणां नूतनम् आश्रयस्थलम्! पञ्चदशाधिक-षट्शताधिकानि (६१५+) नीडानि प्राप्तानि, सुरक्षितक्षेत्रं निर्मातुं सज्जता



हिमसंस्कृतवार्ता — हमीरपुरम्। हिमाचलप्रदेशस्य काङ्गड़ा-मण्डलम् अधुना गृध्राणां (गिद्धों) संरक्षणार्थं सुरक्षितक्षेत्ररूपेण स्वकीयां परिचयं निर्मातुम् अग्रसरम् अस्ति। वन्यप्राणिविभागः काङ्गड़ा-मण्डलं गृध्राणां कृते सुरक्षितक्षेत्रं (सेफ जोन) घोषयितुं सज्जतां कुर्वन् अस्ति। मण्डले गृध्राणां पञ्चदशाधिक-षट्शताधिकानि (६१५+) नीडानां प्रापणम् अस्यां दिशि महती उपलब्धिः मन्यते। विशिष्टवार्ता इयम् अस्ति यत् नेपालदेशस्य 'शुक्लाफाण्टा-राष्ट्रियोद्यानात्' प्रायः षट्शत-किलोमीटर (६०० कि.मी.) दूरं यात्रां समाप्य एकः दुर्लभः श्वेतपृष्ठ-गृध्रः ('व्हाइट् रम्प्ड् वल्चर') पौङ्ग-जलबन्ध-वन्यजीव-अभयारण्यं प्राप्तवान् अस्ति। अस्य गृध्रस्य अभिज्ञानं तस्य शरीरे आरोपितस्य उपग्रह-प्रेषकयन्त्रस्य (सैटेलाइट् ट्रांसमीटर्) माध्यमेन सञ्जातम्।

सूचनानुसारेण नेपालदेशे गृध्राणां संरक्षणार्थं बहूनि सुरक्षितक्षेत्राणि विकसितानि सन्ति। शुक्लाफाण्टा-राष्ट्रियोद्याने अस्मै गृध्राय उपग्रह-प्रेषकयन्त्रम् आरोपितम् आसीत्, तदनन्तरम् अस्य गतिविधिषु दृष्टिः स्थाप्यते स्म। उपग्रहात् प्राप्तस्य स्थानसंकेतस्य (लोकेशन) आधारेण अस्य काङ्गड़ा-आगमनस्य ज्ञातम् अभवत्। पक्षिविशेषज्ञया डॉ. माल्याश्री-भट्टाचार्यया अयं दुर्लभः गृध्रः पौङ्ग-जलबन्ध-वन्यजीव-अभयारण्ये स्वकीये नीडे दृष्टः। हिमाचले अस्याः प्रजातेः उपस्थितिः संरक्षणदृष्ट्या अतीव महत्त्वपूर्णा मन्यते, यतो हि प्रदेशे इयं प्रजातिः प्रायः विलुप्तावस्थां प्राप्तवती आसीत्।

कल्पायां ऋतोः प्रथमा हिमवृष्टिः आरब्धा,

हिमकणेषु पतितेषु पर्यटन-व्यवसायिनां मुखानि प्रफुल्लानि



हिमसंस्कृतवार्ताः- किन्नौर।

जनजातीय- जनपदस्य किन्नौरस्य प्रसिद्धे पर्यटनस्थले कल्पायां रविवासरे वातावरणं परिवर्तनं प्राप्य ऋतोः प्रथमा हिमवृष्टिः आरब्धा। आकाशतः पतद्भिः हिमकणैः सुन्दराः वनाञ्चलाः श्वेतावरणेन आच्छादिताः भवितुम् आरब्धाः। हिमवृष्ट्या सहैव क्षेत्रे शीतस्य प्रकोपः अपि वर्धितः।दीर्घकालात् हिमवृष्ट्याः प्रतीक्षारतानां स्थानीयजनानां, पर्यटन-व्यवसायिनां, पर्यटकानां च कृते वातावरणस्येदं परिवर्तनम् आनन्दम् आनीतवान्। कल्पायां हिमवृष्टिप्रारम्भेण किन्नौरस्य पर्यटन- व्यवसायाय अपि नवीना आशा उद्बुद्धा।

हिमपातेन वर्धिता कल्पायाः सुन्दरता-

कल्पा स्वकीयायाः प्राकृतिक-सुन्दरतायाः, हिमाच्छादित- पर्वतशृङ्गाणां, किन्नरकैलासस्य मनोहारिदृश्यानां च कृते देशे प्रसिद्धा अस्ति। शीतकालस्य समये अत्र हिमवृष्टिं द्रष्टुम् बहवः पर्यटकाः आगच्छन्ति। हिमवृष्टेरनन्तरं कल्पायाः सुन्दरता बहुगुणा वर्धते। देवदारुवृक्षाणां, गृहाणां छदानां, पर्वतानां चोपरि स्थिता हिमन्यूना श्वेतपरत-रेखा पर्यटकान् आकर्षयति। एष एव हेतुः यत् शीतकाले कल्पा देश-विदेशेभ्यः आगच्छन्तानां पर्यटकानां प्रियतम-पर्यटनस्थलेषु परिगण्यते।

होटल-होम-स्टे व्यवसायिनां कृते शुभ-ऋतोः आशा

हिमवृष्टिप्रारम्भेण सहैव पर्यटन-व्यवसायिनाम् आशा अस्ति यत् आगमिषु दिनेषु कल्पायां तत्समीपवर्तिषु पर्यटनस्थलेषु च सैलानीनां सङ्ख्यायां वृद्धिः भविष्यति। अनेन होटल-, होम-स्टे- टैक्सी- ढाबा-सञ्चालकानाम् अन्येषां स्थानीय-व्यवसायिनां च लाभावाप्तिः सम्भाव्यते।गतसमयात् पर्यटन-व्यवसाये वेगस्य प्रतीक्षारतानां व्यवसायिनाम् इदानीं हिमवृष्ट्या उत्तमः पर्यटन- ऋतुः प्राप्स्यते इति आशा बद्धा। यदि आगमिषु दिनेषु अपि हिमवृष्टेः क्रमः निरन्तरं प्रचलति, तर्हि किन्नौरक्षेत्रे शीतकालीन-पर्यटन-गतिविधीनाम् अधिकं प्रोत्साहनं मिलितुं शक्नोति।

किन्नौरस्य सीमावर्तिग्रामे छितकुल-नगरे ऋतोः हिमवृष्टिः

जनजातीय-जनपदस्य किन्नौरस्य सीमावर्तिग्रामे छितकुले रविवासरे हिमवृष्टिः सञ्जाता। प्रातःकालादेव मौसमे परिवर्तनं दृष्टं, ततः परं क्षेत्रे हिमपातस्य क्रमः आरब्धः। हिमकणेषु पतितेषु छितकुल-तत्परिसरेषु च शीतलता प्रवृद्धा। उच्च-पर्वतीयक्षेत्रेषु हिमवृष्टेः कारणात् तापमाने अवनतिः (पतनं) दर्शिता। हिमपातानन्तरं क्षेत्रे शीतस्य प्रभावः वर्धितः अस्ति, जनानां कृते च शैत्यात् रक्षणाय अतिरिक्तम् अवधानं पालनीयं भवति।

हिमेन आवृत्ताः पर्वताः-

छितकुल-क्षेत्रे हिमवृष्टेरनन्तरं परितः स्थिताः पर्वताः प्राकृतिकं दृश्यं च श्वेतावरेण आवृत्तं भवति। सीमावर्तिग्रामे परिवर्तते मौसमे हिमपाते च क्षेत्रस्य दृश्यं शीतऋतुवत् प्रतीयते।



हिमाचले बृहत् प्रशासनिकं परिवर्तनम्: सप्त- एचपीएएस अधिकारिणां स्थानान्तरणम्

हिमसंस्कृतवार्ताः- शिमला।हिमाचलप्रदेशसर्वकारेण प्रशासनिकव्यवस्थायां परिवर्तनं कुर्वता हिमाचलप्रदेश- प्रशासनिकसेवायाः सप्तानाम् अधिकारिणां स्थानान्तरणस्य नूतनपदस्थापनस्य च आदेशाः निर्गमिताः सन्ति। कार्मिकविभागस्य पक्षतः १४ नवम्बर् २०२६ दिनाङ्के प्रसारितायाः अधिसूचनायाः अनुसारेण एते सर्वे आदेशाः तत्क्षणप्रभावेण प्रवर्तिष्यन्ते। राज्यपालस्य पक्षतः निर्गतानाम् आदेशानाम् अधीनम् अधिकारिभ्यः विविधेषु विभागेषु मण्डलेषु च नूतनदायित्वानि समर्पितानि सन्ति।

एतेभ्यः अधिकारिभ्यः लब्धं नूतनं दायित्वम्

अधिसूचनानुसारेण सिद्धार्थ-आचार्यः (HPAS २०१३) भाषा- कला- संस्कृति- विभागे अतिरिक्तसचिवस्य पदे नियुक्तः अस्ति। सः सम्प्रति पदस्थापनस्य प्रतीक्षां कुर्वन् आसीत्।

राजिन्दरकुमारगौतमः (HPAS २०२२) सचिवालय-प्रशासन- विभागे (SAD) उपसचिवः नियुक्तः वर्तते। सोऽपि सम्प्रति पदस्थापनस्य प्रतीक्षां कुर्वन् आसीत्।सञ्जीवठाकुरः (HPAS २०२२), यः काङ्गड़ा-मण्डलस्य ज्वालामुखीस्थाने उपमण्डलाधिकारि-नागरिकपदे (SDO-Civil) कार्यरतः आसीत्, सः धर्मशालायां काङ्गड़ा-मण्डलस्य मण्डल- पर्यटन-विकास- अधिकारी नियुक्तः अस्ति। सः विनयधीमानस्य (HPAS २००८) स्थानं ग्रहीष्यति। सञ्जीवठाकुरः अग्रिमपदस्थापनाय कार्मिकविभागे प्रतिवेदनं कर्तुम् आदिष्टः अस्ति। (नोटः- विनयधीमानमहोदयः अग्रिमपदस्थापनाय कार्मिकविभागे उपस्थातुं निर्देशितः अस्ति)। बचित्तरसिंहः (HPAS २०२३), यः मण्डी- मण्डलस्य बालीचौकी-क्षेत्रे उपमण्डलाधिकारि- नागरिकपदे (SDO-Civil) कार्यरतः आसीत्, सः काङ्गड़ा-मण्डलस्य ज्वालामुखीस्थाने उपमण्डलाधिकारी (नागरिकः) नियुक्तः कृतः।

एतेभ्यः अधिकारिभ्यः अतिरिक्तः कार्यभारः-

बबीताधीमान् (HPAS २०२३), या बिलासपुर-मण्डलस्य घुमारवीं-स्थाने सहायकायुक्तः (राजस्वम्)-सह-तहसीलदार-पदे पदस्थापिता अस्ति, सा कुल्लू-मण्डले सहायकायुक्तस्य पदे नियुक्ता अस्ति। सा रोहितशर्माणं (HPAS २०१९) अतिरिक्तकार्यभारात् मुक्तं करिष्यति, यः कुल्लू-मण्डलस्य मण्डल- पर्यटन-विकास-अधिकारि-पदे कार्यरतः वर्तते।

रजतचौधरी (HPAS २०२५), यः हमीरपुरे सहायकायुक्तः (विकासः)- सह- खण्डविकास-अधिकारि-रूपदे पदस्थापितः अस्ति, तस्मै हमीरपुर-मण्डलस्य भोरञ्जक्षेत्रे अस्यैव पदस्य अतिरिक्तः कार्यभारः समर्पितः अस्ति। कुलवन्तसिंहः (HPAS २०२६), यः सम्प्रति पदस्थापनस्य प्रतीक्षां कुर्वन् आसीत्, सः शिमला- मण्डलस्य कुपवीक्षेत्रे उपमण्डलाधिकारी (नागरिकः) नियुक्तः अस्ति। सः हेमचन्दवर्माणम् (HPAS २०१७) अस्माद् अतिरिक्तकार्यभारात् मुक्तं करिष्यति। हेमचन्दवर्मा सम्प्रति चौपाल-क्षेत्रे उपमण्डलाधिकारि-नागरिक-पदे कार्यरतः अस्ति।

कार्मिकविभागेन निर्गमिताः आदेशाः

इयम् अधिसूचना हिमाचलप्रदेशसर्वकारस्य मुख्यसचिवस्य कमलेशकुमारपन्त-महोदयस्य आदेशैः निर्गमिता अस्ति। आदेशे कार्मिकविभागस्य विशेषसचिवस्य राजीवकुमारस्य हस्ताक्षराणि सन्ति। सर्वकारेण सम्बद्धाः अधिकारिणः विभागाश्च अधिसूचनानुसारेण आवश्यकं कार्याचरणं निश्चेतुं निर्देशिताः सन्ति।

आचार्यविनोबाभावे-महोदयस्य पुण्यतिथौ

विनम्राः श्रद्धाञ्जलयः समर्पिताः



हिमसंस्कृतवार्ताः- भूदानान्दोलनस्य माध्यमेन सामाजिकन्यायस्य, अन्त्योदयस्य भावनायाः प्रचारं प्रसारं च कृतवते महान् समाजसेविने आचार्य-विनोबाभावे-महोदयाय तस्य पुण्यतिथौ विनम्राः श्रद्धाञ्जलयः समर्प्यन्ते। स्वाधीनतासङ्ग्रामे सक्रियां भूमिकां निर्वहन् आचार्यविनोबाभावे-महोदयः स्वजीवनस्य सम्पूर्णं कालं मानवकल्याणाय समाजसेवायै च समर्पितवान्। तस्य उदात्ताः विचाराः, उच्चादर्शाः, सेवाभावना च सर्वदा अस्मान् सत्पथे प्रेरयन्तः मार्गदर्शनं करिष्यन्ति।

एचआरटीसी- लोकयान- क्रयणविवादे

शीतकालीन- अधिवेशने उत्तप्तं भविष्यति सदनम।

प्रतिपक्षनेता जयरामठाकुरः उत्थापितवान् प्रश्नान्

हिमसंस्कृतवार्ताः- शिमला। पूर्वमुख्यमन्त्री प्रतिपक्षनेता च जयरामठाकुरः हिमाचल-पथपरिवहन- निगमस्य विद्युल्लोकयानानां (इलेक्ट्रिक बसयानानां) क्रयणे कथित-भ्रष्टाचारम् अधिकृत्य प्रदेशसर्वकारस्य उपरि लक्ष्यम् अकरोत्। सः अवदत् यत् विधानसभायाः आगामिनि शीतकालीन-अधिवेशने सर्वकारेण सप्तनवत्यधिक-द्विशतं (२९७) विद्युल्लोकयानानां क्रयणं तैः सह सम्बद्धान् निर्णयान् च अधिकृत्य उत्तरं दातव्यं भविष्यति। जयरामठाकुरेण आरोपः आरोपितः यद् अनिवार्य- परीक्षणस्य नियमाः पूर्णतां गमनात् पूर्वमेव लोकयानानां निर्माणम् आपूर्तिश्च विहिता। तेन मुख्यमन्त्रिणः 'हिमाचल ऑन् सेल' अभियानम् अधिकृत्य अपि स्पष्टम् उत्तरं दातुम् अभ्यर्थना कृता।

परीक्षणे असफलानां लोकयानानाम् आपूर्तौ उत्थापिताः प्रश्नाः

जयरामठाकुरः प्रावोचत् यत् एचआरटीसी-निगमस्य निविदायाम् हिमाचलप्रदेशस्य अशीति-विशिष्टमार्गेषु लोकयानानां सफलं परीक्षणम् (ट्रायल) अनिवार्यं कृतम् आसीत्। परीक्षणकाले सम्मुखम् आगच्छन्तीनां न्यूनतानाम् आधारेण लोकयानानाम् आदिप्रारूपे परिवर्तनानि करणीयानि आसन्, पुनः परीक्षणानन्तरमेव निर्माणस्य आपूर्तेश्च प्रक्रिया अग्रे वर्धनीया आसीत्। तेन पक्षः कृतः यत् परीक्षणस्य नियमेषु इदमपि निश्चितम् आसीत् यत् लोकयानम् अशीत्यधिकशत-किलोमीटरमितं दूरं गत्वा अपि तस्य विद्युत्कोषे विंशतिप्रतिशतं (२०%) क्षमता अवशिष्टा स्यास्यति। एतदतिरिच्य अधिकांशानि लोकयानानि प्रायः सार्धशत- किलोमीटरमितं (१५० कि.मी.) दूरं गत्वैव निष्क्रियाणि अभवन्, तेषां विद्युत्कोषक्षमता च न्यूना जाता। बहूनि लोकयानानि मध्यमार्गादेव प्रत्यावर्तनीयानि अभवन्। प्रतिपक्षनेता प्रश्नम् उत्थापितवान् यत् यदा विशिष्टमार्गेषु परीक्षणानि सफलानि न अभवन्, तर्हि लोकयानानाम् आपूर्तिः किमर्थं कृता? परवाणू- सोलन- नालागढ़क्षेत्रेषु लोकयानानि कस्य आदेशेन प्रापितानि तथा निविदायाः नियमानां विपरीता इयं प्रक्रिया कथं सम्पूर्णा जाता?

निविदातः परीक्षणमार्गान् निष्कासयितुम् आरोपितः आरोपः

जयरामठाकुरेण आरोपितं यत् लोकयानानां परीक्षणे असफलतायाः अनन्तरं निविदायां समाविष्टान् मार्गान् निष्कासयितुं प्रयासः कृतः। सः अवदत् यद् अस्मिन् सम्बन्धे निदेशक-मण्डलस्य (बोर्ड ऑफ डायरेक्टर्स) उपवेशने प्रस्तावोऽपि आनीतः आसीत्, किन्तु नियमानाम् अनुरूपः न भवितुं कारणात् सः निरस्तः कृतः। तेन पक्षः कृतः यत् तदनन्तरं कथितरूपेण अन्यैः उपायैः ते मार्गाः निष्कासिताः, यत्र लोकयानानां परीक्षणानि सफलानि न आसन्। जयरामठाकुरस्य अनुसारेण, साम्प्रतं लोकयानानां निकृष्टप्रदर्शनस्य, तेषां प्रत्याह्वानस्य, विविधमार्गाणां च स्थगनस्य स्थितिः सम्मुखम् आगच्छति।



लोकयानानां चलच्चित्राणां प्रसारणे प्रथमाभिसूचनायाः वार्तायाः अपि कृतः उल्लेखः

प्रतिपक्षनेता अवदत् यत् नूतनानि विद्युल्लोकयानानि पृथक्-पृथक् स्थानेषु हरितपताकां प्रदर्श्य प्रचारितानि, किन्तु किञ्चित् कालानन्तरमेव लोकयानानां मार्गे स्थगनस्य यात्रिभिश्च हस्तप्रेरणस्य चलच्चित्राणि (वीडियो) सम्मुखम् आगन्तुम् आरब्धानि। तेन आरोपः आरोपितः यत् सर्वकारेण स्वकीयात् अपयशसः रक्षितुं चलच्चित्राणि प्रसारयितृणाम् उपरि प्रथमाभिसूचनायाः सचेतना प्रदत्ता आसीत्। सः अपृच्छत् यत् कोटिरूप्यकाणां व्ययेन क्रीतानि नूतनानि लोकयानानि प्रारम्भिककाले एव विकलानि किमर्थं भवितुम् आरब्धानि तथा अस्य कृते उत्तरदायी कः अस्ति?

चीनी-संस्थया सम्बद्धायाम् आपूर्तौ अनुरक्षणे च अपि प्रश्नाः

जयरामठाकुरः लोकयानानां क्रयणप्रक्रियया सह तेषां वितरणस्य अनुरक्षणव्यवस्थायाश्च (रखरखाव) उपरि अपि प्रश्नान् उत्थापितवान्। सः अपृच्छत् यत् नूतनानि विद्युल्लोकयानानि प्रदेशस्य पृथक्-पृथक् आगारेषु (डिपो-मध्ये) प्रेषयितुं किं सूत्रम् (फॉर्मूला) अङ्गीकृतं तथा तेषां समानवितरणं कस्मिन् आधारे विहितम्। तेन इदमपि पृष्टं यत् यदा वर्तमानमन्त्रिणः चीनीसंस्थया आपत्तिः अस्ति, तर्हि चीनीसंस्थायाः अंशभागितायुक्तायाः संस्थायाः लोकयानानि किमर्थं क्रीतानि? एतदतिरिच्य तेन वार्षिक-अनुरक्षण-सन्धौ प्रश्नम् उत्थापयता कथितं यत् यदि भविष्ये विद्युल्लोकयानानां समूहं वर्धयितुं योजना अस्ति, तर्हि सर्वकारेण स्वकीयं अनुरक्षण-पारिस्थितिकीतन्त्रम् अपि सज्जीकरणीयम्।

'हिमाचल ऑन् सेल' अभियाने मुख्यमन्त्रिणः याचितम् उत्तरम्

जयरामठाकुरः प्रावोचत् यत् मुख्यमन्त्रिणा 'हिमाचल ऑन सेल' (हिमाचलः विक्रयणाय) इति अभियाने अपि स्पष्टतया उत्तरं दातव्यं भविष्यति। सः अवदत् यत् भाजपादलं प्रदेशस्य निक्षेपान् विक्रेतुं न दास्यति। तस्यानुसारेण, सर्वकारेण एतत् स्पष्टीकरणीयं यत् प्रदेशस्य सम्पत्तिः विरासतश्च अधिकृत्य के निर्णयाः गृह्यन्ते।



प्रथमे एव दिने विधानसभायाम् उत्तप्तं भविष्यति वातावरणम्, बहुषु प्रश्नेषु

सत्तापक्ष-प्रतिपक्षयोः मध्ये सङ्घर्षस्य सम्भावना

प्रथमे दिने दिवङ्गतसदस्यस्य नन्दलालस्य कृते भविष्यति शोकप्रस्तावः

हिमसंस्कृतवार्ता — शिमला।

विधानसभायाः शीतकालीन-अधिवेशनस्य प्रथमे एव दिने स्थगिताः प्रश्नाः सत्तापक्ष-प्रतिपक्षयोः मध्ये सङ्घर्षस्य कारणं भवितुं शक्नुवन्ति। वस्तुतः केषाञ्चन विधायकानां प्रश्नाः गतेभ्यः बहुभ्यः अधिवेशनेभ्यः स्थगिताः प्रचलन्ति, यतो हि सर्वकारेण एतेषु विषयेषु 'सूचना सङ्गृह्यते' इति उत्तरं प्रदत्तम् आसीत्। अस्मिन्क्रमे १६ नवम्बर्-दिनाङ्के सोमवासरे मौखिक-उत्तराय अधुना एते स्थगिताः प्रश्नाः सूचीबद्धाः कृताः सन्ति। यद्यपि सोमवासरे प्रथमे दिने अधिवेशनम् अपराह्णे द्विवादने (२:००) प्रारप्स्यते तथा च सर्वप्रथमं वर्तमानविधानसभायाः आसन्नसदस्यस्य (सीटिङ्ग् मेम्बर्) रामपुरस्य विधायकस्य नन्दलाल-महोदयस्य निधनानन्तरं शोकप्रस्तावोऽपि आगमिष्यति। तदनन्तरं यदि प्रश्नकालस्य समयः अवशिष्टः स्थास्यति, तर्हि स्थगितप्रश्नानाम् अवसरः आगमिष्यति।

एतेषु प्रश्नेषु शाहपुरस्य काङ्ग्रेस-विधायकः केवलसिंहपठानिया राज्यसर्वकारात् आवास-आवण्टन-समितेः उपवेशनानां तेषु च स्वीकृतानां निर्णयानां विवरणम् अयाचत। भाजपा-विधायकौ सुधीरशर्मा विपिनसिंहपरमारश्च राज्य-चयन-आयोगस्य (HPSSC/HPRCA) सङ्गणक-आधारित-परीक्षाभिः (CBT) सम्बद्धस्य सहमतिपत्रस्य (MoU) सूचनाम् अयाचेताम्। जोगिन्द्रनगरस्य भाजपा-विधायकस्य प्रकाशराणावर्यस्य मन्त्रिणां, विधायकानाम्, अधिकारिणां च वेतन-वृत्तिषु जायमानस्य व्ययस्य सम्बद्धः प्रश्नोऽपि अधुना यावत् लम्बितः वर्तते।

भाजपा-विधायकः विपिनसिंहपरमारः सर्वकारीयचिकित्सालयानाम् औषधीनां क्रयणम् अधिकृत्य प्रश्नं पृष्टवान् आसीत्, यस्य उत्तरम् अधुनावधि न आगतम् अस्ति। जसवां-परागपुरस्य भाजपा-विधायकः पूर्वमन्त्री च बिक्रमसिंहः 'जापान-इण्टरनेशनल-कोऑपरेशन-एजेन्सी' (JICA) विश्ववित्तकोषः (वर्ल्ड् बैङ्क्) च सदृशानां परियोजनानां विवरणम् अयाचत, यस्य उत्तरमपि अद्यावधि न प्राप्तम्। सुन्दरनगरस्य भाजपा-विधायकः राकेशजमवालः सर्वकारीयसंस्थानानां पिधानम् अधिकृत्य तथा च भरमौरस्य डॉ. जनकराजः गतेषु त्रिषु वर्षेषु विविधेषु विभागेषु, मण्डलेषु (बोर्ड्), निगमेषु च पटवारी-पञ्चायतसचिव-लिपिक- (क्लर्क), सङ्गणक-प्रचालक-पदानां (कम्प्यूटर ऑपरेटर्) रिक्तस्थानानां सूचनां याचितवन्तौ स्तः। यदि लम्बितप्रश्नानाम् उत्तरानन्तरमपि समयः स्थास्यति, तर्हि प्रथमदिवसस्य नूतनाः प्रश्नाः उपस्थापयिष्यन्ते।

जनजातीयगौरवदिवसस्य अवसरे त्रिपुरायां चतुर्णां नवनिर्मितानाम् 'एकलव्य-आदर्श-आवासीय-विद्यालयानाम्' उद्घाटनम्





जनजातीय-स्वातन्त्र्यसेनानिनः भगवतः बिरसा-मुण्डा-वर्यस्य १५१ तम्याः जयन्त्याः— जनजातीयगौरवदिवसस्य अवसरे अद्य त्रिपुरायां चतुर्णां नवनिर्मितानाम् 'एकलव्य-आदर्श-आवासीय-विद्यालयानाम्' उद्घाटनं कृतम्। राज्ये अन्ययोः द्वयोः विद्यालययोः भवनानां शिलान्यासः अपि कृतः।प्रधानमन्त्री नरेन्द्रमोदी जनजातीयदिवससमारोहं सम्बोधयन् महाराष्ट्रस्य गढ़चिरोली-स्थानात् आभासीमाध्यमेन (वर्चुअल माध्यमेन) एतेषां चतुर्णां विद्यालयानाम् उद्घाटनं कृतवान्। नवनिर्मिताः विद्यालयाः छमनु, मनु, अम्पी तथा हेजामारा-स्थानेषु स्थिताः सन्ति, यदा तु माण्डवी-अमरपुरयोः निर्माणकार्यम् आरब्धम् अस्ति।त्रिपुरायाः मुख्यमन्त्री डॉ. माणिक-साहा, जनजातीयकल्याणमन्त्री बिकाश-देबबर्मा, विधायकः शम्भूलाल-चकमा, सांसदाः, त्रिपुरा-जनजातीय-क्षेत्र-स्वायत्त-जिला-परिषदः प्रतिनिधयः तथा जिलाधिकारिणः च विभिन्नेषु स्थानेषु आयोजितेषु कार्यक्रमेषु उपस्थिताः आसन्।मुख्यमन्त्री डॉ. माणिक-साहा अवदत् यत् सामाजिकपरिवर्तनाय शिक्षा आवश्यकी अस्ति तथा तेन जनजातीयछात्राणां कृते शैक्षणिक-अवसराणां विस्तारार्थं सर्वकारस्य प्रतिबद्धता पुनः प्रकटिता। तेन जनजातीयविकासस्य क्षेत्रे त्रिपुरायै प्राप्तयोः तिसृणां राष्ट्रीयपुरस्काराणाम् उपलब्धेः अपि उल्लेखः कृतः। एतेषु 'पीएम-जन-मन' तथा 'धरती आबा जनजातीय ग्राम उत्कर्ष अभियानम्' च सम्मिलिते स्तः। मुख्यमन्त्री उक्तवान् यत् राज्यसर्वकारः जनजातीयछात्रेभ्यः छात्रावासभत्तं, छात्रवृत्तिः, वित्तीयसहायता, योग्यतापुरस्काराः तथा निःशुल्कपाठ्यपुस्तकानि च इति विविधप्रकारकं साहाय्यं प्रददाति।त्रिपुरायाः राज्यपालः इन्द्रसेना-रेड्डी-नल्लू अगरतलायां आयोजिते समारोहे भागं गृहीतवान्। राज्यपालः आङ्ग्ल-औपनिवेशिक-शासनस्य विरुद्धं भगवतः बिरसा-मुण्डा-वर्यस्य साहसपूर्णं सङ्घर्षं राष्ट्राय तस्य सर्वोच्चबलिदानं च स्मरन् अवदत् यत् तस्य परम्परा देशे सर्वत्र भाविपीढीः प्रेरयन्ती स्थास्यति।

गोमती-महोत्सवे आचार्यविनोदकुमार-मिश्राय 'गोमतीगौरवसम्मानः' प्रदत्तः



हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, लखनऊ। केन्द्रीय- संस्कृत- विश्वविद्यालयस्य गोमतीनगरपरिसरे आयोजिते भारतीयसंस्कृतेः साहित्यस्य च विराट-महोत्सवे 'गोमतीमहोत्सवे' वैदिकविद्यायां, ज्योतिषशास्त्रे, संस्कृतशिक्षायां भारतीय- ज्ञान-परम्परायां च कृतानाम् अभिनवप्रयोगाणां विशिष्टयोगदानस्य कृते लखनऊस्थस्य श्रीशिवप्रसाद- संस्कृत-महाविद्यालयस्य प्राचार्यः आचार्यः विनोद-कुमारमिश्रः 'गोमतीगौरवसम्मानेन' सम्मानितः। अस्मिन् गौरवपूर्णे समारोहे उत्तरप्रदेशसर्वकारस्य उपमुख्यमन्त्रिणौ केशवप्रसादमौर्यः बृजेश पाठकश्च, विधानपरिषदः सदस्यः पवनसिंह चौहानः, भारतीयजनतापक्षस्य प्रदेशोपाध्यक्षः नीरजसिंहश्च उपस्थिताः आसन्। एतेषां गणमान्यजनानां गरिमामयी उपस्थितौ आचार्यविनोदकुमारमिश्राय सम्मानः प्रदत्तः। अस्मिन् अवसरे केन्द्रीय- संस्कृत-विश्वविद्यालयस्य गोमतीनगरपरिसरस्य निदेशकः प्रो. सर्वनारायणझा, गोमतीमहोत्सवसमित्याः सदस्याः राजीवमिश्रः, सर्वेश अस्थाना, रामकृष्णयादवश्च उपस्थिताः आसन्।

आचार्यविनोदकुमारमिश्रस्य एतत् सम्मानप्राप्तिः संस्कृतशिक्षाजगते भारतीयज्ञानपरम्परायाश्च कृते गौरवस्य विषयः अस्ति। तेन प्राप्तम् एतत् सम्मानं संस्कृतविद्यायाः संवर्धनाय तथा भारतीयसंस्कृतेः संरक्षणाय प्रेरणाप्रदं भविष्यति।

सेनाप्रमुखः जनरल धीरजसेठः चेकगणराज्यस्य चतुर्दिवसीयाम् आधिकारिकयात्रां करिष्यति



हिमसंस्कृतवार्ताः- नवदेहली। भारतीयसेनायाः सेनाप्रमुखः जनरल धीरजसेठः श्वः प्रभृति चेकगणराज्यस्य चतुर्दिवसीयाम् आधिकारिकयात्रां करिष्यति। अस्याः यात्रायाः अवसरे जनरल सेठः प्रागनगरे स्थिते प्रधानसेनापतिमण्डलस्य मुख्यालये चेकगणराज्यस्य सशस्त्रसेनायाः वरिष्ठैः सैन्याधिकारिभिः सह महत्त्वपूर्णां विचारविमर्शसभां करिष्यति। अस्मिन् विमर्शे प्रधानसेनापतिमण्डलस्य प्रथमः उपप्रमुखः, उपरक्षाप्रमुखः लेफ्टिनेन्ट जनरल् पेट्र सेपेल्का अपि सहभागं करिष्यति।

तदतिरिक्तं जनरल सेठः प्रधानसेनापतिमण्डलस्य मुख्यालये आयोजिते विशेषसमारोहे वीरगतिं प्राप्तेभ्यः सैनिकेभ्यः श्रद्धाञ्जलिं समर्पयिष्यति। यात्रायाः समये सः रक्षामन्त्रालयस्य वरिष्ठाधिकारिभिः सह अपि शिष्टाचारमेलनं करिष्यति। अस्याः यात्रायाः माध्यमेन भारत-चेकगणराज्ययोः रक्षासहयोगः, सैन्यसम्बन्धाः तथा पारस्परिकमैत्री च अधिकं सुदृढा भविष्यन्ति।

गोण्डाजनपदे नवम्बरमासस्य १७ दिनाङ्के बृहत्- आजीविकामेला आयोजयिष्यते, २५ तः अधिकाः प्रतिष्ठिताः संस्थाः, सहस्राधिकानि आजीविकावसराणि च

हिमसंस्कृतवार्ताः- गोण्डा। उत्तरप्रदेश-आजीविकामिशनस्य अन्तर्गतं क्षेत्रीय-सेवायोजन- कार्यालयेन, गोण्डा द्वारा युवजनानां कृते एकदिवसीयः बृहत्-आजीविकामेलायाः आयोजनं क्रियते। अस्मिन् आजीविकामेलायां पञ्चविंशत्यधिकाः प्रतिष्ठिताः औद्योगिकसंस्थाः भागं ग्रहीष्यन्ति। ताभिः सहस्राधिकेषु रिक्तपदेषु अभ्यर्थिनां चयनं करिष्यते। अस्मिन् मेलायां अष्टादशवर्षेभ्यः चत्वारिंशद्वर्षपर्यन्तं वयस्काः अभ्यर्थिनः भागं ग्रहीतुं शक्नुवन्ति। दशमकक्षोत्तीर्णाः, द्वादशकक्षोत्तीर्णाः, औद्योगिक- प्रशिक्षणसंस्थानात् उत्तीर्णाः, पॉलिटेक्निक-प्रशिक्षिताः, स्नातकाः, स्नातकोत्तर- पदवीधारिणश्च अभ्यर्थिनः अत्र आवेदनं कर्तुं शक्नुवन्ति। चयनप्रक्रिया पूर्णतया निःशुल्का भविष्यति। अयं आजीविकामेला नवम्बरमासस्य सप्तदशे दिनाङ्के, मङ्गलवासरे, प्रातः दशवादनात् प्रारभ्य गोण्डाजनपदस्य लालबहादुरशास्त्री- स्नातकोत्तर- महाविद्यालये आयोजयिष्यते। अस्मिन् कार्यक्रमे गोण्डा-सदरविधानसभाक्षेत्रस्य माननीयः विधायकः प्रतीकभूषणसिंहः मुख्यातिथिरूपेण उपस्थितः भविष्यति। तस्य उपस्थितौ विभिन्नेषु पदेषु अभ्यर्थिनां चयनस्य अवसरः प्रदास्यते। अतः आजीविकामपेक्षमाणाः सर्वे युवजनाः स्वकीयैः आवश्यकैः शैक्षणिकप्रमाणपत्रैः, परिचयपत्रैः अन्यैः आवश्यकैश्च दस्तावेजैः सह निर्धारितसमये आयोजनस्थलं प्राप्य अस्य अवसरस्य लाभं गृह्णन्तु इति आयोजकैः आवेदितम्। निःशुल्कपञ्जीकरणाय जालपुटम्- rojgaarsangam.up.gov.in, सहायतादूरभाषसङ्ख्या- १५५३३० अधिकविवरणाय- linktr.ee/sewayojan

महाराष्ट्रस्य राज्यपालः जिष्णुदेववर्मा गडचिरोलीनगरे जनजातीय- गौरवदिवससमारोहे सम्बोधितवान्



हिमसंस्कृतवार्ताः- महाराष्ट्रस्य राज्यपालः जिष्णुदेववर्मा महाराष्ट्रराज्यस्य गडचिरोलीजनपदे आयोजिते जनजातीयगौरवदिवससमारोहे जनसमूहं सम्बोधितवान्। अस्मिन् अवसरे राज्यपालः अवदत् यत् अद्य वयं धरती-आबा-इति नाम्ना विख्यातस्य भगवान् बिरसा-मुण्डामहोदयस्य एकपञ्चाशदधिकैककशततमं (१५१तमं) जन्मजयन्तीमहोत्सवं समाचरामः। सः केवलं स्वातन्त्र्यसङ्ग्रामस्य महान् सेनानी एव नासीत्, अपि तु सामाजिकजागरणस्य, सांस्कृतिकास्मितायाः, अन्यायस्य विरुद्धं सङ्घर्षस्य च महान् प्रतीकः अपि आसीत्। भगवान् बिरसा-मुण्डा-महोदयस्य जीवनं त्यागस्य, साहसस्य, स्वाभिमानस्य च प्रेरणादायकम् उदाहरणम् अस्ति।

षष्ठीदेव्याः पूजनं श्रद्धया सम्पन्नम्, अस्ताचलगामिने सूर्याय अर्घ्यं समर्प्य छठपर्व श्रद्धाभक्तिपूर्वकं समाचरितम्



सम्पूर्णे भारते श्रद्धया विश्वासेन च छठपर्व समायोजितम्

हिमसंस्कृतवार्ताः-षष्ठीदेवी, या लोकभाषायां छठीमाता इति नाम्ना प्रसिद्धा अस्ति, सन्तानानां दीर्घायुषः, आरोग्यस्य, सुखसमृद्धेः च प्रदात्री देवी इति श्रद्धया पूज्यते। पुराणेषु षष्ठीदेव्याः महिमा विशेषरूपेण वर्णितः अस्ति। अग्निपुराणे सा भगवान् स्कन्दस्य पत्नी विडालाक्षी इति रूपेण अपि वर्णिता अस्ति।

प्राचीनकाले सम्पूर्णे भारते षष्ठीदेव्याः पूजनस्य परम्परा प्रचलिता आसीत्। वर्तमानकाले विशेषतः पूर्वभारते सन्तानानां मङ्गलाय, दीर्घायुषे तथा कल्याणाय षष्ठीदेव्याः पूजनं सूर्यस्य साक्षिणि श्रद्धया क्रियते।

षष्ठीदेव्याः ध्यानमन्त्रः-

ॐ गौराभां द्विभुजां षष्ठीं नानालङ्कारभूषिताम्।
सर्वलक्षणसम्पन्नां पीनोन्नतपयोधराम्॥
दिव्यवस्त्रपरिधानां वामक्रोडे सपुत्रिकाम्।
प्रसन्नवदनां ध्याये जगद्धात्रीं सुखप्रदाम्॥ अस्य मन्त्रस्य भावार्थः अस्ति यत्- भक्ताः गौरवर्णां, द्विभुजां, विविधाभरणैः विभूषितां, दिव्यवस्त्र-धारिणीं, वामक्रोडे पुत्रं धारयन्तीं, प्रसन्नवदनां जगद्धात्रीं सुखप्रदां च षष्ठीदेवीं ध्यायन्ति।

षष्ठीदेव्याः प्रणाममन्त्रः-

जय देवि जगन्मातर्जगदानन्दकारिणि।
प्रसीद मम कल्याणि नमस्ते षष्ठि देवि ते॥
अस्य भावार्थः- हे जगन्मातः! हे सम्पूर्णजगतः आनन्दप्रदायिनि देवि! भवत्यै जयः। हे कल्याणकारिणि षष्ठीदेवि! मयि प्रसन्ना भवतु। तुभ्यं सादरं नमस्कारः। छठपर्वणि व्रतधारिणः भक्ताः अस्ताचलगामिने सूर्याय अर्घ्यं समर्प्य लोककल्याणाय, सन्तानानां दीर्घायुषे, आरोग्याय च प्रार्थनां कृतवन्तः। सम्पूर्णे देशे श्रद्धाभक्तिपूर्वकं सूर्योपासनायाः इदं महापर्व हर्षोल्लासेन समाचरितम्। इदं पर्व भारतीयसंस्कृतेः, प्रकृतिपूजनस्य, मातृशक्तेः, पारिवारिक- मङ्गलस्य च अनुपमं प्रतीकम् अस्ति।

डुमरियागञ्जविधानसभाक्षेत्रे छठमहा-पर्वणि व्रतिभ्यः शुभकामनाः प्रदत्ताः



हिमसंस्कृतवार्ताः- वृजेश कुमार पाण्डेयः

पथराबाजारस्य नहरस्थिते छठघट्टे सायङ्कालीन-अर्घ्यसमर्पणावसरे श्रद्धालुभ्यः शुभेच्छाः प्रेषितवती विधायक सैयदा खातून। अद्य डुमरियागञ्ज-विधानसभाक्षेत्रान्तर्गते पथराबाजारस्य नहरस्थितं छठघट्टं प्राप्य डुमरियागञ्जविधानसभाक्षेत्रस्य विधायिका सैयदा खातून लोकश्रद्धायाः सूर्योपासनायाश्च महापर्वणः छठपूजायाः पावनावसरे सायङ्कालीनार्घ्यं समर्पयितुं समागतान् सर्वान् श्रद्धालून् व्रतधारिणीः मातृः भगिनीश्च हार्दिकाभिनन्दनैः शुभकामनाभिश्च अभ्यनन्दयत्। अस्मिन्नवसरे सा छठीमातुः भगवान् सूर्यदेवस्य च श्रीचरणयोः प्रार्थनां कृतवती यत् सर्वेषां जीवनं सुखेन, समृद्ध्या, उत्तमस्वास्थ्येन च परिपूर्णं भवेत् तथा च सर्वेषां परिवारेषु सुखशान्तिः सौहार्दं च सदैव विराजेत्।

भारतीयवायुसेनायाः त्रयोदशस्य आधारभूत- नवीकरण- भण्डारस्य स्वर्णजयन्ती समारोहः आयोजितः नवदिल्ली-नगरे संगोष्ठ्याः आयोजनं कृत्वा गौरवपूर्णसेवायाः पञ्चाशद्वर्षाणि समाचरितानि



हिमसंस्कृतवार्ताः- नवदिल्ली। भारतीयवायुसेनायाः त्रयोदशेन आधारभूत-नवीकरण- भण्डारेण नवदिल्ल्यां संगोष्ठ्याः आयोजनं कृत्वा स्वस्य गौरवपूर्णसेवायाः पञ्चाशत् वर्षाणां पूर्तिः समारोहपूर्वकं समाचरिता। अस्याः संगोष्ठ्याः अध्यक्षताम् अनुरक्षण-नियन्त्रणस्य वायुसैनिक- प्रधानाधिकारी एयरमार्शल यल्ला उमेशः कृतवान्।

अस्मिन् अवसरे उपस्थितान् जनान् सम्बोधयन् एयरमार्शल यल्ला उमेशः अवदत् यत् वायुरक्षा-व्यवस्थायाः प्रभावशीलता तस्याः परिचालनात्मक-उपलब्धतायाम् आश्रिता भवति। तेन स्वदेशे एव अत्याधुनिकानां रक्षोपकरणानां दोषाणाम् अन्वेषणाय, तेषां परिष्काराय, पुनः कार्यक्षमत्व-सम्पादनाय च स्वदेशीयसामर्थ्यस्य विकासस्य आवश्यकतायां विशेषतया बलं प्रदत्तम्।

राष्ट्रमण्डलीयमहिला-सांसद-सम्मेलनस्य उद्घाटनं करिष्यति लोकसभाध्यक्षः ओमबिरला बेङ्गलूरु-नगरे नवम्बरमासस्य सप्तदशे दिनाङ्के सम्मेलनस्य शुभारम्भः



हिमसंस्कृतवार्ताः- नवदेहली। लोकसभाध्यक्षः ओमबिरला नवम्बरमासस्य सप्तदशे दिनाङ्के कर्णाटकराज्यस्य बेङ्गलूरुनगरे राष्ट्रमण्डलीय-महिला- सांसदानां भारतक्षेत्रीयसम्मेलनस्य उद्घाटनं करिष्यति। अस्य द्विदिवसीयसम्मेलनस्य विषयः अस्ति- सुदृढाः आधाराः, सशक्ताः स्वराः च समावेशी आभासीय- अन्तर्जालक्षेत्रं, नवमहिला-विधायिकानां कृते मार्गदर्शनस्य अवसराः।

अस्मिन् अवसरे कर्णाटकराज्यस्य मुख्यमन्त्री डी. के. शिवकुमारः, राज्यसभायाः उपसभापतिः हरिवंशः, कर्णाटकराज्यस्य उपमुख्यमन्त्री डॉ. जी. परमेश्वरः च अन्ये च गणमान्याः जनाः उपस्थिताः भविष्यन्ति।

लखनऊनगरे मुख्यमन्त्रिणा योगिना युवभ्यः वितरिताः टङ्कणपट्टिकाः, पञ्चविंशतिलक्ष-

टङ्कणपट्टिका- वितरणकार्यक्रमस्य शुभारम्भः



हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, लखनऊ। उत्तरप्रदेशस्य मुख्यमन्त्री योगी आदित्यनाथः अद्य लखनऊनगरे आयोजिते पञ्चविंशतिलक्ष-टङ्कणपट्टिका- वितरणकार्यक्रमे प्रतिभागं कृत्वा प्रदेशस्य युवभ्यः छात्रेभ्यश्च टङ्कणपट्टिकाः (टैबलेट) वितरितवान्। अस्मिन् अवसरे मुख्यमन्त्री अवदत् यत् अद्य अत्र चतुर्षु जनपदेषु आगताः छात्राः उपस्थिताः सन्ति। टङ्कणपट्टिकाप्राप्त्यर्थं सर्वेभ्यः छात्रेभ्यः हार्दिक्यः शुभकामनाः। एताः टङ्कणपट्टिकाः प्रदेशस्य सर्वेषु जनपदेषु, सर्वेषु ग्रामेषु च प्राप्स्यन्ति।

मुख्यमन्त्रिणा उक्तं यत् अस्याः योजनायाः माध्यमेन प्रदेशस्य युवानः आधुनिकप्रौद्योगिक्याः लाभं प्राप्स्यन्ति, तेषां शिक्षायां डिजिटलमाध्यमानां च उपयोगः सुलभः भविष्यति।

"अन्तरिक्षयानं "वायेजर-१" इति नाम्ना पृथिव्याः १ प्रकाशदिवसस्य दूरम्



हिमसंस्कृतवार्ताः- रविः खरिडेहालः - बेङ्गलूरु।

"अन्तरिक्षयानं "वायेजर-१" इति नाम्ना पृथिव्याः १ प्रकाशदिवसस्य दूरं प्राप्तवान् अस्ति।" प्रकाशदिवसः अन्तरिक्षे दूरस्य एककं भवति। प्रकाशदिवसः इत्युक्ते प्रकाशः एकदिवसे यावत् दूरी गच्छाति तावत् दूरी अस्ति। एकः प्रकाशदिवसः प्रायः २६ बिलियन् किलोमीटर समीपे अस्ति। वायेजर-१ अन्तरिक्षयानं ४९ वर्षपूर्वं प्रक्षेपितम् आसीत्। १ प्रकाशवर्षस्य दूरं गन्तुं १८००० वर्षाणि अधिकं यावत् समयः स्यात्। तदा तस्य द्विगुणं समयं तारकत्वं प्राप्स्यति। आगामि बुधवासरे वायेजर-१ अन्तरिक्षयानेन एतत् दूरं प्राप्तं भविष्यति। यथा अपि तारान्तराकाशमार्गेण यात्रां निरन्तरं करोति। वितन्तु-संकेताः पृथिव्यां प्राप्तुं अहोरात्रः व्यतीतः वा चतुर्विंशतिहोराः व्यतीताः यावत् समयः स्यात्। एते संकेताः प्रकाशस्य वेगेन गच्छन्ति।

नीतिआयोगः नवम्बरमासस्य सप्तदशे दिनाङ्के पञ्च राष्ट्रियकार्यशालानां शृङ्खलाम् आरभते।

प्रधानमन्त्रिणः नरेन्द्रमोदिनः शासनप्रमुखरूपेण पञ्चविंशतिवर्षाणां कार्यकालात् प्राप्तानाम् अनुभवानां शिक्षाणां च अध्ययनम् अस्याः कार्यशालाशृङ्खलायाः प्रमुखम् उद्देश्यम् अस्ति।एताः कार्यशालाः पञ्चसु प्रमुखेषु विषयेषु केन्द्रिताः भविष्यन्ति। ते विषयाः सन्ति- ध्येयाधारितं नेतृत्वं, सेवाप्रदायनरूपं सुशासनं, समावेशी विकासः, सभ्यतागतं वैशिष्ट्यं वैश्विकस्तरे भारतस्य भूमिका च। एषा कार्यशालाशृङ्खला आगामिवर्षस्य अक्तूबरमासपर्यन्तं प्रचलिष्यति।

विधानसभा सामान्यनिर्वाचनम्-२०२७

सेक्टरदण्डाधिकारिभ्यः द्विपर्यायेषु प्रदत्तं विस्तृतं प्रशिक्षणम्

हिमसंस्कृतवार्ताः- वृजेश कुमार पाण्डेयः,



१५ नवम्बर २०२६ दिनाङ्के जनपदस्य चतुर्षु विधानसभाक्षेत्रेषु नियुक्तेभ्यः १२५ सेक्टर-दण्डाधिकारिभ्यः समाहरणालयस्य सभागारे द्वयोः पर्याययोः विस्तृतं प्रशिक्षणं प्रदत्तम्। प्रशिक्षणसत्रे भारतीय-निर्वाचनायोगस्य निर्देशानां, निर्वाचनसम्बद्धानां दायित्वानां तथा कार्यप्रणाल्याः च विषये विस्तरेण जानकारी प्रदत्ता। अस्मिन्नवसरे निर्देशितं यत् सेक्टरदण्डाधिकारिणः निर्वाचनप्रक्रियायाः महत्त्वपूर्णाः कर्णधाराः सन्ति। ते पीठासीनाधिकारिणां मतदानदलानां च तथा निर्वाचनक्षेत्रस्य निर्वाचकपञ्जीकरणाधिकारिणः (रिटर्निंग ऑफिसर) जनपदस्य मुख्यनिर्वाचनाधिकारिणः च मध्ये समन्वयं स्थापयन्ति। अतः सर्वैः अधिकारिभिः प्रशिक्षणं पूर्णगाम्भीर्येण ग्रहीतव्यं, निर्वाचनायोगस्य निर्देशानां सम्यगध्ययनं कृत्वा स्वकीयदायित्वानां कुशलतया निर्वहणं च सुनिश्चितं करणीयम्।सर्वेभ्यः सेक्टरदण्डाधिकारिभ्यः स्वस्वनिर्धारित- क्षेत्रान्तर्गत मतदानकेन्द्राणां मतदानस्थलानां च स्थलीयनिरीक्षणं कर्तुं निर्देशाः प्रदत्ताः। निरीक्षणसमये अवरोधरहितप्रवेशाय सोपानमार्गस्य (रैम्प), विद्युत्संयोजनस्य, पेयजलस्य, शौचालयस्य, आसनव्यवस्थायाः, मतदानकेन्द्रं प्रति गमनमार्गस्य च समुचितोपलब्धिः सुनिश्चितीकरणीया। संवेदनशीलानां अतिसंवेदनशीलानां च मतदानकेन्द्राणां विशेषतया निरीक्षणं कृत्वा तत्रत्यस्थितेः सम्यगाकलनं करणीयम्। कस्यापि न्यूनतायाः प्राप्तौ तत्क्षणमेव सम्बन्धिताधिकारिणः सूचनीयाः, येन समये एव तस्याः निराकरणं कर्तुं शक्यते।तदतिरिक्तं सम्बन्धितैः बूथस्तरीयाधिकारिभिः (बी.एल.ओ.) पर्यवेक्षकैः च सह सभा आयोज्य प्रत्येकस्मिन् मतदानकेन्द्रे पञ्जीकृतानां समग्रमतदातृणां, पुरुषमतदातृणां महिलामतदातृणां च सङ्ख्यासहिताः मतदातृसूच्यासम्बद्धाः सर्वाः आवश्यकाः सूचनाः अद्यतनाः स्थापनीयाः। सम्बन्धितेन निर्वाचक- पञ्जीकरणाधिकारिणा सह निरन्तरं समन्वयः अपि स्थापनीयः इति निर्देशितम्। निर्वाचनसम्बद्धाः सर्वाः सज्जताः निर्धारितसमये सुव्यवस्थितरीत्या च सम्पादनीयाः। अस्माकं सङ्कल्पः अस्ति यत् विधानसभा-सामान्यनिर्वाचनम्-२०२७ निष्पक्षतया, पारदर्शितया, निर्विघ्नतया शान्तिपूर्णवातावरणे च सम्पन्नं भवेत्। निर्वाचन- सम्बद्धकार्येषु कस्मिन्नपि स्तरे प्रमादः कदापि न क्षम्यते।

व्याकरणचिन्तनम्- १०

क्वसु/क्तवतु-प्रत्यययोः परिचयः-

सूत्रम्- 'क्वसुश्च' इति।
अर्थः- छन्दसि विषये लिटः क्वसुः आदेशो भवति। यथा- पपिवान्, जक्षिवान्
भूतकाले कर्तरि- क्वसु-प्रत्ययः भवति।
यः कृतवान्- सः क्वसु।
धातु + क्वसु = भूतकालिकं कर्तृवाचकपदम। क्वसु-प्रत्ययस्य स्वरूपम्-
क्वसु = वस् क् - इत्, उ - इत्, शेषः - वस्। रूपाणि- क्वसुप्रत्ययान्तपदमं त्रिषु लिङ्गेषु भवति। लिङ्गरूपम् उदाहरणम्-
कृधातोः पुंलिङ्गे- वान्, कृतवान्।
स्त्रीलिङ्गे- वती, कृतवती।
नपुंसके- वत्, कृतवत्। वैदिकरूपे-
पुं - जग्मिवान्, स्त्री - जग्मुषी, नपुं - जग्मिवत्। विशेषतः छन्दसि क्वसु-प्रत्ययः युज्यते, प्रत्ययोऽयं भूतकालिकः, प्राचीनः च। आधुनिककाले बहुधा उपयुज्यमानः प्रत्ययस्तु क्तवतुरेव। अतः अस्यविंशतिवाक्यो-दाहरणानि, अभ्यासाय अत्र प्रस्तूयन्ते-
१. रामः वनं गतवान्।
२. सीता वनं गतवती।
३. फलं वृक्षात् पतितवत्।
४. शिष्यः पाठं पठितवान्।
५. बालिका गीतं गीतवती।
६. अहं कार्यं कृतवान्। ७. गुरुः शिष्यं दृष्टवान्।
८. माता भोजनं पक्ववती। ९. सैनिकः शत्रुं हतवान्।
१०. कृषकः क्षेत्रे बीजम् उप्तवान्।
११. बालकः पुस्तकं लिखितवान्।
१२. राजा प्रजां रक्षितवान्।१३. नदी सागरं प्रविष्टवती।
१४. सूर्यः उदितवान्। १५. लतायां पुष्पं विकसितवत्।
१६. देवः वरं दत्तवान्। १७. छात्राः परीक्षाम् उत्तीर्णवन्तः। १८. योद्धारः युद्धं जितवन्तः।
१९. अर्जुनः गाण्डीवं गृहीतवान्।
२०. त्वं सत्यम् उक्तवान्।
क्वसु-प्रत्ययस्य मुख्य-धातवः - स्मरणार्थम्
धातोः क्वसु-रूपम्, त्रिषु लिङ्गेषु-
गम्- गतवान्/ गतवती/ गतवत्।
कृ- कृतवान्/ कृतवती/ कृतवत्।
पठ्- पठितवान्/ पठितवती/ पठितवत्।
दृश्- दृष्टवान्/ दृष्टवती/ दृष्टवत्।
दा- दत्तवान्/ दत्तवती/ दत्तवत्।
स्था- स्थितवान्/ स्थितवती/ स्थितवत्।
लिख्- लिखितवान्/लिखितवती/लिखितवत्।
पच्- पक्ववान्/ पक्ववती/ पक्ववत्।
हन्- हतवान्/ हतवती/ हतवत्।
भेदः- क्वसु-क्तवतोर्मध्ये भेदः-
क्वसुः- वैदिकः, प्राचीनः- जग्मिवान्, चक्रिवान्, इत्यादयः। क्तवतु- लौकिकः, आधुनिकः- गतवान्, कृतवान् इत्यादयः
अर्थः उभयोः समानः एव- भूतकालिके कर्तृपदमिति।



असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

कुमारभास्करवर्म-संस्कृत-पुरातनाध्ययन-विश्वविद्यालये तृतीयदीक्षान्तसमारोहानुष्ठानम्



कुमारभास्करवर्मसंस्कृतपुरातनाध्ययनविश्वविद्यालयेन समायोजिते तृतीयदीक्षान्त-समारोहे१६ शोधकर्तृभ्यः विद्यावारिधिः (पी.एच्.डी) इत्युपाधिः तथा च ४० आचार्यशिक्षार्थिभ्यः स्वर्णपदकप्रदानं कृतम्।

नलबारि, १५ नवम्बर, २०२६ :

हिमसंस्कृतवार्ता डॉ. निशिकान्तपाण्डेयः

कुमारभास्करवर्मसंस्कृतपुरातनाध्यय-नविश्वविद्यालयस्य तृतीयदीक्षान्तसमारोहः १५ नवम्बर, २०२६ दिनाङ्के रविवासरे विश्वविद्यालयपरिसरे आयोजितः।अयं कार्यक्रमः राष्ट्रगीतेन, असमराज्यगीतेन च आरब्धः। अस्मिन् गौरवपूर्णे समारोहे असमराज्यस्य माननीयः मुख्यमन्त्री डॉ. हिमन्तविश्वशर्मा मुख्यातिथिरूपेण उपस्थितासीत्। विशिष्टातिथिरूपेण असम-सर्वकारस्य वित्तमन्त्री तथा नलबाडीजनपदस्य विधायकः श्रीमान् जयन्तमल्लबरुवा उपस्थितः आसीत्। उल्लेखनीयं यत् अस्मिन् दीक्षान्तसमारोहे डॉ. निखिलवर्मणः, डॉ. निशिकान्तपाण्डेयः, डॉ.बुद्धदेवपुरकायस्थ इत्यादिभ्यः १६ शोधच्छात्रेभ्यो विद्यावारिधि इत्युपाधिः प्रदत्ता। तदतिरिक्तं विश्वविद्यालयस्य विभिन्नविभागानां ४० आचार्यशिक्षार्थिनः स्वर्णपदकेन सम्मानिताः। अस्मिन् समारोहे स्नातकोत्तरस्य ८४०, समन्वितपाठ्यक्रमस्य ५९, स्नातकोत्तर-डिप्लोमा २१, एकवर्षीय-डिप्लोमाइत्यस्य ३६, स्नातकस्य २, प्रमाणपत्रस्य ८६ तथा च संस्कृताध्ययन-गवेषणायाः (परम्परा) ८१४ इति सर्वमाहत्य १८७४ शिक्षार्थिभ्यः प्रमाणपत्राणि प्रदत्तानि। संस्कृतविभागेषु सर्वाधिकाङ्कप्रापकेभ्यः श्री लिराज काफले (२०२४), श्री निहाली शर्मा (२०२५) तथा श्री बन्दिता देवी इत्येभ्यः ध्रुवनारायणगोस्वामि-माखनीगोस्वामि-स्मृति-पुरस्कारः प्रदत्तः। प्रत्येकपुरस्कारप्रापकेभ्यः दशसहस्ररुप्यकाणि प्रदत्तवन्तः। विश्वविद्यालयस्य कुलपतिः प्रो.प्रह्लाद आर. जोशी महोदयः स्वागतभाषणे विश्वविद्यालयस्य प्रतिष्ठाकालात् वर्तमानपर्यन्तं विश्वविद्यालयस्यास्य शैक्षणिकपक्षस्य विवरणं प्रस्तुतवान्। ततः परं विश्वविद्यालयस्य परीक्षानियन्त्रकः डॉ. प्रशान्तज्योतिगौतमः स्नातक-स्नातकोत्तर-उत्तीर्णेभ्य उपाधीः प्रदत्तवान्। उपकुलपतिः प्रो. मल्लिका कलिता विद्यावारिधि (पी.एच्.डी.)-प्रापकानां नामानि उद्घोष्य तेभ्यः प्रमाणपत्राणि प्रदत्तवती। मुख्यातिथिः तथा असमराज्यस्य माननीयो मुख्यमन्त्री डॉ. हिमन्तविश्वशर्मा शिक्षार्थिनः उद्दिश्य स्वभाषणं प्रदत्तवान्। प्राचीनभारतीय-संस्कृतेः मूल्यबोधस्य तथा च तस्य आधारे निर्मितोऽयं विश्वविद्यालयो भविष्यत्काले मूल्यबोधाधारित-समाजनिर्माणे योगदानं निर्वहिष्यतीति आशा तेन प्रकटिता। विश्वविद्यालयस्य पाठ्यक्रमे पुराणेतिहास-वेदवेदान्तज्ञानैः सह भविष्यद्-दृष्ट्या उपयुक्तं पाठ्यक्रमं निर्मातुं तथा च संस्कृतशिक्षायाः प्रसारे सर्वे अग्रे आगच्छन्तु इति आह्वानं कृतवान्। अस्मिन् कार्यक्रमे विश्वविद्यालयस्य अध्यापक-अध्यापिकाः,कर्मचारिणः,शोधच्छात्राः विद्यालय स्य अन्यविभागानां छात्राः, नलबाडी-नमाटिग्रामयोः निवासिनश्च उपस्थिताः आसन्। प्रायः २२५० जनाः आसन् ।

हास्यकणिका

१. विस्मृतः कः?

सन्ताः मित्र बन्त, अद्य मम हस्ते किम् अस्ति इति यदि त्वं वदसि, तर्हि अस्मिन् विद्यमानानि सर्वाणि पञ्च दाडिमानि (अनार) तुभ्यं दास्यामि।

बन्तः: (चिन्तयित्वा) मित्र, तव हस्ते 'दाडिमानि' सन्ति!

सन्ताः अरे वाह! त्वं तु अतीव बुद्धिमान् असि। किन्तु कः तुभ्यम् उक्तवान् यत् तानि पञ्च सन्ति इति?

२. चन्द्रस्य सूर्येण सह तुलना

सन्ताः बन्त, वद तावत्— सूर्यः अधिकः महत्त्वपूर्णः अस्ति अथवा चन्द्रः?**बन्तः:** निस्सन्देहं चन्द्रः एव अधिकः महत्त्वपूर्णः अस्ति!सन्ताः तत् कथम्?बन्तः: पश्य मित्र, चन्द्रः रात्रौ अन्धकारे प्रकाशं ददाति, यदा प्रकाशस्य आवश्यकता भवति। सूर्यः तु दिने प्रकाशं ददाति, यदा सर्वत्र पूर्वमेव प्रकाशः भवति!



ब्रह्मप्रोक्तं सूर्यनामवर्णनस्तोत्रम् सूर्यदेवस्य स्तुतौ पवित्रस्तोत्रम्।

- वृजेश कुमार पाण्डेयः

सूर्योपासनायाः महत्त्वं प्रतिपादयति भविष्यपुराणे वर्णितं ब्रह्मप्रोक्तं सूर्यनामवर्णनस्तोत्रम्।

भारतीयसनातनधर्मे सूर्यदेवस्य उपासना विशेषमहत्त्वं धारयति। सूर्यदेवः जगतः प्रकाशस्य, ऊर्जायाः, जीवनस्य च प्रमुखः स्रोतः अस्ति। वेदेषु पुराणेषु च सूर्यदेवस्य महिमा विविधैः स्तोत्रैः मन्त्रैश्च वर्णितः अस्ति। भविष्यपुराणस्य ब्राह्मपर्वणः एकसप्ततितमेऽध्याये ब्रह्मणा प्रोक्तं सूर्यनामवर्णनस्तोत्रं वर्णितमस्ति। अस्मिन् स्तोत्रे भगवान् सूर्यः आदित्यः, रविः, भास्करः, मार्तण्डः, विवस्वान्, दिवाकरः, प्रभाकरः, मित्रः, तपनः, अर्कः इत्यादिभिः पवित्रनामभिः स्तूयते।

ब्रह्मा कथयति यत् सूर्यदेवः सर्वेषां प्राणिनां जीवनस्य आधारः, समस्तजगतः प्रकाशकः, सर्वभूतानां हितकर्ता च अस्ति। सः सप्तलोकानां स्वामी, सप्ताश्वयुक्तरथस्य आरूढः तथा ज्योतिषां पतिः इति वर्णितः। अस्मिन् स्तोत्रे सूर्यदेवस्य विविधस्वरूपाणां महिमा वर्णिता अस्ति। सर्वेषां प्राणिनां कल्याणाय, दुःखनिवारणाय, धर्मपालनाय च सूर्यदेवस्य प्रार्थना क्रियते। पुराणोक्तवचनानुसारं यः साधकः प्रातः सायं च शुचित्वेन, एकाग्रचित्तेन च अस्य स्तोत्रस्य पाठं करोति, सः सूर्यदेवस्य अनुग्रहेण स्वाभिलषितफलानि प्राप्नोति। धनकामः धनं, धर्मकामः धर्मं, राज्यकामः राज्यम्, रोगार्तः आरोग्यं च प्राप्नोतीति अस्य स्तोत्रस्य माहात्म्ये प्रतिपादितम्।

अस्य स्तोत्रस्य पाठः सन्ध्योपासनायाः अङ्गरूपेणापि महत्त्वपूर्णः मन्यते। श्रद्धया सूर्योपासनां कुर्वन् साधकः आत्मिकशान्तिं, सद्बुद्धिं तथा सकारात्मकप्रेरणां प्राप्नोति।

सूर्यगायत्रीमन्त्रः-ॐ आदित्याय विद्महे सहस्रकिरणाय धीमहि। तन्नः सूर्यः प्रचोदयात्॥

सूर्यबीजमन्त्रः-ॐ ह्रां ह्रीं ह्रौं सः सूर्याय नमः॥

इति ब्रह्मप्रोक्तं सूर्यनामवर्णनस्तोत्रस्य माहात्म्यम्।

सन्दर्भः- भविष्यपुराणम्, ब्राह्मपर्व, अध्यायः ७१, श्लोकाः २-१६। सूर्यनारायणस्य कृपा सर्वेषु भवतु। सर्वे जनाः निरामयाः, सुखिनः, समृद्धाश्च भवन्तु।

संस्कृत-गीतम्

संस्कृतभाषा संस्कृतम्, संस्कृतिभाषा संस्कृतम्।
चारुभाषा संस्कृतम्, भाषोत्तमा वै संस्कृतम् ॥१॥
शास्त्राणां भाषा संस्कृतम्, षड्दर्शनभाषा संस्कृतम्।
वेदानां भाषा संस्कृतम्, उपनिषदः भाषा संस्कृतम् ॥२॥
मधुरा भाषा संस्कृतम्, दिव्या भाषा संस्कृतम्।
सर्वत्र भवतु संस्कृतम्, भूयाद् जनवाणी संस्कृतम्॥३॥
सर्वे जानन्तु संस्कृतम्, सर्वे वदन्तु संस्कृतम्।
पठन्तु सर्वे संस्कृतम्, जयतु भाषा संस्कृतम् ॥४॥

- डॉ. सुरेशकुमारशर्मा,रायपुरं, छत्तीसगढम्



हिमसंस्कृतवार्ता
डॉ. वर्षा प्रकाश टोणगांवकर
लेखिका, पुणे (महाराष्ट्रम्)

"गुणः"

परह्यः आकाशवाण्योऽपरि मम प्रिय गीतं अहं श्रुतवती।"ओ रे मांझी ओ ओ..... तस्य मम प्रियः भागः..... "मन की किताब से, तुम नाम मेरा मिटा देना। गुण था तो न कोई अवगुण मेरे भुला देना। ओ रे मांझी.... "

एषा लेखनप्रक्रिया 'गुण-अवगुण' शब्दस्य कारणेन मनसि उत्पद्यमानानां तरङ्गानाम् आधारेण 'गुण' शब्दस्य चयनं कृत्वा क्रियते।

गुण मनोधर्मस्य, द्रव्यधर्मस्य, आन्तरिकधर्मस्य, ज्ञानस्य, कलायाः, सत्यस्य, शौर्यस्य सर्वेषां संज्ञा अस्ति। सांख्यन्यायसाहित्यादिषु शास्त्रेषु एषः शब्दः दृश्यते। सांख्यै त्रयः गुणाः स्वीकृताः सन्ति। स सत्त्वंरजस्तमा च। सत्त्वगुणं तस्मिन् ज्ञानपूर्णम्। रजोगुणः प्रीतीस्वरूपम्। तमोगुणश्च अविद्याद्भवः प्राणिमोहयति। {संदर्भ- भगवद्गीता}।

द्वितीयः दृष्टिकोणः सुख- दुःखपूर्णः अस्ति। अस्मिन् सत्त्वः सुखात्मकः, रजः दुःखात्मकः तथा च तमः विषादात्मकः इति मन्यते। एतत् मनोवैज्ञानिकं दृष्टिकोणम् अपि वक्तुं शक्नुमः। सांख्यकारिकायानुसारं सत्त्वः प्रकाशकः,रजः प्रेरकः, तमः च सर्वतः निर्जीवः आवृत्तः च।

न्यायदर्शनानुसारं गुणसंख्या चतुर्विंशति इति कथ्यते। मनुना षड्गुणाः उक्ताः सन्ति-

"सन्धि च विग्रहं चैव
यानमासनमेव च।
द्वैधीभावं संश्रयं च
षड्गुणांश्चिन्तयेत्सदा।।"

{मनु.७.१६०}

काव्यगुणः- विशिष्टशब्दाः, सरलशब्दाः, सुलभसमासाः, इत्यादयः काव्यस्य सौन्दर्यं वर्धयन्ति। एतदेव काव्यगुणः उच्यते। एतेषां गुणानाम् संख्यायां पर्याप्तं मतभेदः अस्ति। केषाञ्चन मते चतुर्विंशतिः काव्यगुणाः सन्ति, अन्येषां मते तु त्रीणि एव। किन्तु दशसंख्याकाः काव्यगुणाः बहुमान्याः अस्ति।दशकाव्यगुणाः- श्लेषः, प्रसादः, समता, माधुर्यः, सौकुमार्यः, अर्थव्यक्तिः, उदारता, ओजः, कान्तिः, समाधिः। "षट्त्रिंशत् गुणाः- वरवधूयोः कुण्डलीयोः मेलनं कुर्वन् षट्त्रिंशच्च गुणाः दृश्यन्ते। अतः मित्राणि 'गुण' इति शब्दः मनसि आगत्य मम मनसि ये विचाराः उत्पन्नाः तेषां विषये अहं लिखितवती। कृपया स्वप्रतिक्रियाम् अवश्यं लिखतु। लेखनकाले मया कृताः अवगुणाः च विस्मरन्तु। 🙏🙏



हिमसंस्कृतवार्ताः, ईदरधीरजः

वार्ता-संवादः

नन्दिनी- नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये। अद्य मया एका विचित्रा विज्ञान-वार्ता पठिता। वैज्ञानिकैः एकः नूतनः कृत्रिमः कोमलः पदार्थः निर्मितः। सः पदार्थः विद्युत्कोशेन यन्त्रेण च विना जीवित-हृदयम् इव स्वयमेव नियमितं स्पन्दते। तस्य अन्तः रासायनिक- प्रक्रियया सः सङ्कुचति प्रसरति च। भविष्ये मृदु-यन्त्रमानवानां कृत्रिमाङ्गानां च निर्माणे अस्य उपयोगः भविष्यति इति वैज्ञानिकैः उक्तम्।

काव्या- अहो आश्चर्यम्! यन्त्रं विना अपि हृदयवत् स्पन्दनम् अतीव अद्भुतम् अस्ति। अधुना मया पठितां काञ्चित् रोचकां सामाजिक-वार्तां शृणु। अमेरिका-देशस्य नैशविल्-नगरे 'गेला थॉम्पसन' नाम्नी एका महिला निवसति। तस्याः दशवर्षाणां विवाहः विच्छिन्नः जातः। तया चिरकालात् वराह- पालनस्य कामना कृता परन्तु पूर्व-पतिना सा निवारिता। विवाह-विच्छेदात् परं तया स्वकामनाम् पूरयितुम् एका लघ्वी वराही गृहे आनीता। तस्याः नाम 'डेजी' इति च कृतम्। अधुना सा वराही पञ्चाशत्-पौण्ड-परिमिता स्थूला जाता। सा गृहस्य अन्तः एव वसति, पाकशालायाः कपाटान् उद्घाटयितुम् अपि जानाति, सूत्रेण बद्धा आपणम् अपि गच्छति। इदानीं तया अन्यः अपि वराहः आनीतः। एकं लघु-कृषिक्षेत्रं च स्थापयितुं सा इच्छति।

नन्दिनी- हह! वराह्या सह नूतन-जीवनस्य आरम्भः अतीव हास्यकरः सुखदः च अस्ति। इदानीं देश-सम्बद्धाम् एकां प्रेरणादायिनीम् वार्ताम् मया स्मृताम् कथयामि। अक्षत-श्रीवास्तवः नाम एकः भारतीयः युवकः सुवर्ण-भूमिम् अर्थात् थै-देशं गतः। सः 'चियाङ्गायि' नगरस्य स्वच्छताम् उत्तम- यातायात-व्यवस्थां च दृष्ट्वा अतीव विस्मितः। तत्र व्यस्ते मार्गे अपि जनाः अनावश्यकं वाहन-ध्वनिं न कुर्वन्ति। तेन दृष्टं यत् एकेन 'टेस्ला'-वाहनेन पादचारिणे मार्गं दातुं स्वयमेव स्थित्वा मार्गदर्शनार्थम् सङ्केतदीपाः अपि प्रज्वालिताः। तेन सुवर्णभूमेः यातायात-व्यवस्था स्वच्छता च बहु प्रशंसिते। तेन उक्तं यत् नगरस्य स्वच्छता केवलं सर्वकारस्य दायित्वं नास्ति, अपि तु नागरिकाणाम् अपि।

काव्या- सत्यं नन्दिनि! यदि वयं सर्वे नागरिकाः नियमान् पालयामः, तर्हि अस्माकं भारतदेशः अपि तथा एव स्वच्छः भविष्यति। अधुना अस्माकं चरमाम् एकां रहस्यमयीं विज्ञानवार्तां शृणु। डेनमार्कदेशस्य प्राचीनमठेषु पुरातत्त्वविद्भिः कानिचन अस्थिपञ्जराणि प्राप्तानि। वैज्ञानिकपरीक्षणे एतानि अस्थीनि तेषां मठानां निर्माण- कालात् अपि शतशः वर्षैः पूर्वतनानि इति ज्ञातम्। प्रथमं तु एते जनाः 'काल-यात्रिणः' इव प्रतीताः। परन्तु 'दक्षिण- डेनमार्क- विश्वविद्यालयस्य' शोधकर्तृभिः इदं रहस्यम् उद्घाटितम्। तैः भिक्षुभिः जनैः च स्व-जीवने बहवः समुद्रमत्स्याः खादिताः। गभीर-समुद्रस्य जले बहुप्राचीनः अङ्गारकः (कार्बन-१४ पदार्थः) तिष्ठति। मत्स्य-भोजनेन सः प्राचीनः अङ्गारकः तेषां शरीरे प्रविष्टः। अतः काल-मापक-यन्त्रम् अपि भ्रान्तं जातम्, अस्थीनि च अधिक-प्राचीनानि दर्शितानि।

नन्दिनी- अहो मत्स्यानां महिमा! मत्स्य-भोजनेन काल-मापक-यन्त्रम् अपि भ्रान्तम् इति अतीव कौतुकपूर्णं सत्यम् अस्ति। एताभ्यः रोचकवार्ताभ्यः अहं कृतज्ञताम् अर्पयामि तुभ्यम्, काव्ये! अद्यतनः वार्ता-कार्यक्रमः अत्र समाप्तः। पुनर्मेलिष्यामः।

काव्या- अहम् अपि कृतज्ञताम् अर्पयामि तुभ्यं, नन्दिनि! एताः सर्वाः वार्ताः अतीव विचित्राः मनोरञ्जकाः च वर्तन्ते। सर्वेभ्यः शुभं भवतु।



श्रीमद्भगवद्गीतायाः
प्रथमाध्यायस्य (१५-२५ श्लोकानाम्) आधारेण
दश प्रश्नोत्तराणि

१. प्रश्नः – श्रीकृष्णस्य शङ्खस्य नाम किम् आसीत्?उत्तरम् – श्रीकृष्णस्य शङ्खस्य नाम 'पाञ्चजन्यः' आसीत्।

२. प्रश्नः – धनञ्जयः (अर्जुनः) कं शङ्खं दध्मौ (वादितवान्)?उत्तरम् – धनञ्जयः 'देवदत्तम्' इति नाम्ना शङ्खं दध्मौ।

३. प्रश्नः – वृकोदरः भीमसेनः कं महाशङ्खं दध्मौ?उत्तरम् – वृकोदरः भीमसेनः 'पौण्ड्रम्' इति नाम्ना महाशङ्खं दध्मौ।

४. प्रश्नः – कुन्तीपुत्रः राजा युधिष्ठिरः कं शङ्खं वादितवान्?उत्तरम् – कुन्तीपुत्रः राजा युधिष्ठिरः 'अनन्तविजयम्' इति शङ्खं वादितवान्।

५. प्रश्नः – नकुलः सहदेवश्च कौ शङ्खौ दध्मतुः?उत्तरम् – नकुलः 'सुघोषम्' तथा सहदेवः 'मणिपुष्पकम्' इति शङ्खौ दध्मतुः।

६. प्रश्नः – पाण्डवानां शङ्खनादस्य धार्तराष्ट्राणां (कौरवाणां) हृदयेषु कः प्रभावः अभवत्?उत्तरम् – पाण्डवानां तुमुलः शङ्खनादः नभः पृथिवीं च अनुनादयन् धार्तराष्ट्राणां हृदयानि व्यदारयत् (विदीर्णानि अकरोत्)।

७. प्रश्नः – कपिध्वजः अर्जुनः धृतराष्ट्रपुत्रान् व्यवस्थितान् दृष्ट्वा कं प्रति स्ववचनम् अवदत्?उत्तरम् – कपिध्वजः अर्जुनः हृषीकेशं (श्रीकृष्णं) प्रति स्ववचनम् अवदत्।

८. प्रश्नः – अर्जुनः श्रीकृष्णं रथं कुत्र स्थापयितुम् अकथयत्?उत्तरम् – अर्जुनः श्रीकृष्णम् उभयोः सेनयोः मध्ये रथं स्थापयितुम् अकथयत्।

९. प्रश्नः – अर्जुनः किमर्थम् उभयोः सेनयोः मध्ये रथं स्थापयितुम् ऐच्छत्?उत्तरम् – युद्धे के सह तेन योद्धव्यम् इति युद्धकामान् अवस्थितान् योद्धून् निरीक्षितुम् अर्जुनः उभयोः सेनयोः मध्ये रथं स्थापयितुम् ऐच्छत्।

१०. प्रश्नः – अर्जुनस्य प्रार्थनां श्रुत्वा श्रीकृष्णः रथं कयोः समक्षं स्थापितवान्?उत्तरम् – अर्जुनस्य प्रार्थनां श्रुत्वा श्रीकृष्णः उभयोः सेनयोः मध्ये भीष्म-द्रोण-प्रमुखतः सर्वेषां च महीक्षितां (राज्ञां) समक्षम् उत्तमं रथं स्थापितवान्।